॥ पलकर्णगुणा त्रिज्याहृत्या तामध्यमाश्रुतिः ॥ नवलार्कदोर्ज्यया भक्ताः खाभ्रभ्रघ्नाहिताग्नयः ७७० पर ॥ पलकर्णगुणः सोत्रपलभा
या धृता भवेत् ॥ उद्वृत्तगे रवौच्छायाकर्णो यः समसंडले ॥ परोक्षच्छाययानिघ्नः पलकर्णाहृतः श्रुतिः ॥ उद्वृत्तार्कप्रभाकर्णश्चरज्या
घ्राहृतोत्यया ॥ दिनार्धार्कप्रभाकर्णा यद्वा हृत्तसमश्रुती ॥ कुज्ययाध्यवतात्यागुणिते हृतिसाजिते ॥ दिनार्धार्कप्रभाकर्णौ कि
मार्केध्यसमौ वतो ॥ युयातशोषयोरल्पमुन्नतं स्वकपालजं ॥ तथा नतं वतत्रस्तं तदूनं द्युदलं भवेत् ॥ अथैवमिष्टकाले पिच्छा
याकर्णस्य साधनं ॥ युरात्रोन्नतकालाद्वैतरेणानयुताज्यका ॥ गोलक्रमेण तत्सत्रांभवेत् द्युज्यागुणहृतं ॥ त्रिज्यया तत्कला
संज्ञं यद्वा स्वन्नं द्युजीवया ॥ निघ्नं चरज्यया भक्तं कलासा रविसंगुणा ॥ पलकर्णहृता चेष्टयष्टिः स्यादथ स्वनके ॥ स्वद्युकृतनरा
भ्यस्तां भक्ता वा स्वचरज्यया ॥ इष्टयाष्टिरथार्कस्य चरज्यागोलदिक्क्रमात् ॥ स्त्रेत्र युता नितासेष्टा स्यके वोक्षितिजाख्या ॥ द्यु राम
तो निघ्ना कलासेष्टहृतिरेवं स्वयष्टिका ॥ इष्टोद्धृतनरेणात्र युतो निष्टनरो भवेत् ॥ नतोत्क्रमज्यका बाणस्तेन हीनोत्यका भ ७८

२

५ याम्यगोले कुजाधोस्य दृश्यतत्राहृतानहि ॥ अतः परानुपातार्थं योग्यत्वेनाहृतो नरैः ॥ सममंडलमध्याप्ते रवौ प्राग्गणितेन यः ५

वेत् ॥ इष्टान्त्यकातथा बाणो द्युज्या भास्त्रिज्यया हृता ॥ लब्ध्या रव्यंतं द्युतेनो नाहतिरिष्टहृतिर्भवेत् ॥ लब्धमर्कगुणं भक्तं पलश्रुत्या भवेत्
शंकु ॥ उद्धृतशंकुना निघ्नो बाणो वा तत्र रज्यया ॥ ऊर्ध्वसंज्ञं भक्तेन हीना मध्यनरो भवेत् ॥ इष्टशंकुर्नतादेवमिष्टात्यहतितो
थवा ॥ दिनार्धशंकुवत्कार्यमिष्टशंकोश्च साधनं ॥ तद्वच्छंकोः स्वदृग्ज्या स्यात्तच्छायावत् श्रुतिः ॥ यत्रक्रान्तिशुद्धिविशेषात्र्यं
केनैवस्तु ध्यात ॥ विलोमशोधनात् कापो विधिरत्रोत्कवद्बुधैः ॥ किंतु योगे वियोगश्च वियोगे तद्युतिस्तथा ॥ नतपंचेंदुनाडी
तोधिकस्याच्चनतदानतं ॥ पंचेंदुहीनितं तत्कलात क्रमज्यात्रिभज्यया ॥ गुणानतोत्क्रमज्यास्याद्दृश्यो हृताद्द्विजोनरः ॥ शंकु
रुत्पद्यते सोपि स्यात्परानयनापूर्वं ॥ अक्षांशाभ्यधिकाक्रांतिर्यस्य तस्य द्युरात्रजं ॥ मंडलं तदसंस्पृष्टं समहृतेनतत्र वै ॥
तद्धृतेः समशंकोर्यत्स्वरूपं तादृहोच्यते ॥ स्वेष्टकाले द्युरात्रस्थहृते तोर्बोधाग्रं नयेत् ॥ सर्वसमार्गवृत्तं च तथा प्राक्परस्व
त्रतः ॥ कोटिवत्समवृत्ते वा भित्वा गोलोर्धगं चयत् ॥ इतिसूत्रेण संलग्नं तत्सूत्रं सममनाभवेत् ॥ तत्रैक्याच्च तथा सूत्रं हृतेस्त
हृतिसंज्ञकं ॥ प्रोक्तमेवद्युरात्रस्थायस्तु नास्ति तत्कृतः ॥ नतहृज्जीवागुणिताद्यमौर्वीविष्ठा दिग्गंशोद्भवकोटिमौर्व्या ॥ तथो
पहृतार्धजविस्तरेण तथा त्रिमौर्व्या विहृता क्रमेण ॥ आद्यं तु दृग्हृतनतांशजीवा द्वितीयगं स्याद्युपहृत्तगासा ॥ तृतीयकं
स्यात्फलवृत्तगा सा तान्निर्विलोमेन नतांशुदोर्ज्या ॥ पूर्वापरस्वास्तिकसक्तवृत्तं दृग्वृत्तनतप्राशागतं फला रव्यौ ॥ फलारव्य

त-वि-
८०

दृनस्तनतांशकानां याकोटिजीवाहरसंज्ञकः स्यात्॥ क्रियागुणे हारहृते भुजाख्यापमज्यके तत्फलचापके ये॥ तदंतरे कर्य स
मभिन्नाद्दृक्केद्रोः क्रांतिमौर्व्याः स्युरिहाक्षिभागाः॥ हराहताद्रोःफलचापकेद्विज्यकात्रिभज्याविहृतानरः स्यात्॥ हराहताद्रोः
फलचापदोर्ज्या दृग्ज्याहृता दिग्लवसिंजिनी स्यात्॥ नहारयोर्वर्गवियोगमूलं वा दृग्ज्ययाप्तं त्रिगुणेन निघ्नं॥ दिग्ज्याततयो
र्व्यस्तविधिक्रमेण नतासवश्चापमभागकाः स्युः॥ अक्षांशकाः क्रांतिफलस्य चापैर्वा संस्कृता दोःफलचापभागाः॥ तदक्षयो
र्व्यस्तमु स्कृतेश्च चापांशकाः क्रांतिफलस्य वैधाः॥ भुजाख्यदृग्ज्याननतांशजीवावर्गांतरालाप्तपदं नतज्या॥ फलाख्यहृत्त्रिभ
नत्फलाख्यनतांशजीवाहतिरुद्धृता स्यात्॥ दृग्जीवया दिग्लवकोटिमौर्वी तच्चापहीना नवतिर्दिगंशाः॥ फलाख्यनम्रांशगुणाक्रि
मौर्व्यो र्घातः पृथक् सोक्षिहृतो द्युमौर्व्या॥ नतासुभेद्योवफलं भवेतां भान्नतासु युग्गुणा हृतेस्यात्॥ एवं हि दृङ्मंडलनम्रभागदि
कोटिजीवाहतिरेवताभ्यां॥ पृथक् मिथः संभजना हराभ्यां सिद्धिस्तयोरेव यथोक्तवत्स्यात्॥ कृतापक्रान्तिपि नतज्यकाना
द्यासार्धयो राहतितो विवेकं॥ सर्वं च कालनियमान्तरभेरितायातामेवाहि द्युमतः प्रवदामि तस्यः॥ भिन्नखरवदिग्लवदृग्भ
वमंडलाभादिभेदतोपि गणितेक सुसूक्ष्मरीत्या॥ दृग्मंडलं दिग्भवमंडलं च याम्योत्तरं तत्र खमध्यतोये॥ नाड्याख्ययं यावदि
हाक्षभागा यावत्तना प्राक् स्यतः खकोद्रं॥ तच्चापमोंशाद्युदलिकि वस्युर्नतांशकाः खेटगताः खमध्यात्॥ खमध्यदेशाद्द्रु
राम
८०

शाद्र
दृग्मंडलस्थं दृग्मंडलं यन्निज्ञगभेसृजे॥ खस्वाक्षिकाद्यादिशिमेलके स्याता दिग्भावखेटदिगंशकास्ते॥ याम्योत्तराचासमभंडलाद्ये
दिगंशकास्ते कलयाम्यसौम्याः॥ ते याम्यगोले तु सदैव याम्याः सौम्ये तु याम्योत्तरगाः कुजोर्ध्वे॥ यद्दिग्भवाः खेटकपालसंस्था
दिगंशकास्तत्खचरापरस्थे॥ कपालके तत्सम दिग्लवास्युस्तद्व्यादिक्कुह्यानियतस्वगोले॥ दिगंशकोटिज्येयथा विनिघ्नी ८३
लंबांशजीवा त्रिभजीवयाप्ता॥ तच्चापभागो नतखांकतुल्यः परोथतज्ज्या विहृता विनिघ्नी॥ त्रिभज्यया स्वाक्षलवापमा
शज्यके त्वभीष्टे भवनस्यतत्र॥ तच्चापतुल्या निहचेदसिताक्षापमौ तु तास्यां युदलेन तांशाः॥ तथोन्नतांशास्वततःप्रभा
तत्कर्णशंकुरांकोर्वशतः पुरावत्॥ खाक्षांशकस्वापमभागदिकौ दृष्टाक्षभागापमभागकाः स्युः॥ सौम्याग्रकाल्पस्वदिग
शमौर्व्या परो यदास्वापमसंमितः स्यात्॥ यदा भवाग्राधिकादिग्लवज्या तदैकभासाधनमुक्तवत्स्यात्॥ अतोन्यथेष्टाक्ष
लवाः कृताय तदूनखाष्टं द्युमितां श्रयेक्षाः॥ नाध्याय यथोक्तान्यमना दृग्भाद्भावात्कृतापमादेवहि भाद्वयं स्यात्॥ कुजोर्ध्वमि
थोवपलान्तरेतु विचार्यमार्यैर्यमसौम्यगोले॥ सौम्येक्षगोले यदि दिग्लवज्या कल्पका स्वापमभागकेषु॥ स्वाक्षाल्प
कोस्यदितमार्यं वर्यैः छायाद्वयान्नकपालभेदात्॥ एवं हि तत्रैव यदाक्षभागानल्पाश्च ते स्वापमभागकाः स्युः॥ तदा भवेद
कपाल एव छायाद्वयं कालविभेदसिद्धं॥ इत्थं कपालद्वयभाप्रसंगे यास्या दस्तुद्वाक्षवशात्प्रभात्र॥ साथोम्यादिग्लि

त्रि·वि· च खेचरस्यतेयोर्द्दिग्वृत्तांशवशाच्च सा स्यात् ।। भासौम्यादिग्दिग्मंडलस्थखेचरस्य तेनांशा दिङ्मंडलदिङ्नरोत्था ।। ध्रुवात्र दृङ्मंडल
जद्युयोगाद्दिस्थिरखगोले सुधिया विचार्या ।। एवं यदा चैककपालएव छायाद्वयं साधितमस्ति तत्र ।। यद्दयद्युदिनार्धनिकटेऽतस्य
८९ भवेद्युज्ज्याक्षसमुद्भवा सा ।। दूरा ध्रुवस्यान्यभवेद्दिग्वृत्तांशदाभा समाताङ्गणितपुरा तं ।। परात्पकस्वापमभागके तु भास्य लविदं
नैवतयोः समत्वे ।। दिग्ज्याग्रयोस्या क्षितिजे समेव ततस्तदल्पाथततो निबध्या ।। समाग्रकाकाध्यधिका च सौम्ये गोलेऽपमा
स्वापमकाधिकत्वे ।। एवं दिनार्धावधिवैपरीत्यादूर्ध्वं दिनार्धान्तु जदेवबोध्यं ।। स्वापक्रमस्वाक्षलवाल्पकाले परांशक्रान्ते
र्भवतिगोले ।। अल्पाधिकोपादपमस्तदास्या सौम्येक्रमाद्यैककपालजा भा ।। सदोत्तरा चाल्पकदिग्ज्यकायां माद्ये क्र
मभादितमंस्वतंत्रैः ।। अल्पाग्रकायां यदि दिग्ज्यकायामेकप्रभायामपि संभवः स्यात् ।। यदापमस्वापमभागतुल्यस्तदा रकतं
दृग्मिता अभीष्टाः ।। कोत्यंशकास्तत्र तु यक्षभागः इष्टाग्रचरेशकुलवाल्लदूनाः ।। स्वांशकान्ततांशा अथवापरांशस्वाक्षज्यया राम
वर्गवियोगमूलं ।। त्रिज्यागुणं संविहृतं परांशज्यया नतज्या च ततः प्रभा स्यात् ।। परस्वतत्क्रान्तिपलांशकानां साम्ये तु शंकौ ८९
रिह नैव भा स्यात् ।। अक्षांशयं चैवाध्यधिकः परांश्यापमस्तथा सा परिवर्धते भा ।। गोदे समत्वेऽप्यपमाक्षयोर्भा भावो ध्रुमावः
सुधियाह्य एवं ।। खेचरापमलवाः परभागीयः कथं विदधिकाना भवेयुः ।। विद्यो ग्यमपिवृत्ततितवद्गुमीतिश्वर चलुत तिवलम्

यं ।। भद्रास्करप्रभृतिभिः स्वकृतौ कपालोक्तं दिग्भाद्वयं यदभिरकरवगत्रकालः ।। दिग्ज्याल्पकत्वनियमोपि खनंदभागे
रिष्टापमता दिह दिग्युनिरीकयोगात् ।। यत्तत्तिह नरभा हि तयं हि ते स्वङ्क्यामादि समत्वमिहास्ति ।। तत्तदक्तिहिकपालकोभे
दात्रान्यथात्र बुधकिंतु समेका ।। सैव भास भवति चैककपालेऽयनतत्र नरा कमिता स्यात् ।। एकाद्दिग्युनिरामंडलजेकयो
गताद्द्युतितः किल भेसूनः ।। एकादिग्भानयनं कुजोर्ध्वदृग्वृत्तादिक्कुं निजसौम्यगोले ।। उदीरितं तत् किल याम्यगोले सं
जायते स्वाक्षक्षितिजादधस्तात् ।। यद्वैकदिग्भानयनं हि याम्ये कुजोर्ध्वमग्राधिकदिग्ज्यकायां ।। मत्सौम्यगोले क्षितिजाद
धस्तादथोपपत्तिं शृणु गोलसंस्थां ।। ।। खमध्यगं गोलकरां च प्रकल्प्य दृग्वृत्तयाम्योत्तरवृत्तनाडीवृत्तक्रान्तिखेतकल्प्या क्षिति
जं त्वयनवृत्तं तत्र तयोरंतरं दिगंशकोटिमितं परक्रान्तिः स्यात् ।। दृग्वृत्तनाडीवृत्तसंपातान्नवररेखा ध्रुवासन्नमिह वृत्तं ।
तात्क्षितिजसंपातो ध्रुवो ।। इष्टवृत्ते ध्रुवात् दृग्वृत्तावधीष्टक्रान्तियाम्योत्तरवृत्ते खमध्यात् ध्रुवावधिर्लंबांशाः क्षितिजाच्चांशास्त
त्र इष्टक्रान्त्यंशान्प्रसाध्यतत्कोट्यंशाः कार्यास्ते दृग्वृत्तनाडीवृत्तयोगात् पागोलसंधस्तदंतरयोः क्रमेण क्रान्तिनाडीवृत्तरूप
पारंतरगोः परक्रान्तिरूपा अयनाभिधेयस्वेष्टवृत्ते ।। अथ दृग्वृत्ते नतकोटस्थे खमध्यं पावदिष्टक्षितिजाः क्रान्त्यंशाः ध्रुवो
ग्भुवो ।। याम्योत्तरवृत्ते खमध्यान्नाडीवृत्तावधिस्वाक्षांशा स्तथाग्रहसंबंधि ध्रुवद्वयो र्दृग्वृत्ते नाडीदृग्वृत्तयोरंतरं स्व।

पमांशा।अत्रेष्टक्रांत्यंशादक्षवृत्तस्थक्षेत्रांशा।एवंतत्रस्वाक्षापमौभुजौनदिष्टाक्षापमौकर्णौनाडीवृत्तेतत्कोटीचेति चापजात्य
त·वि· द्वयमक्षक्रांतिसंबंधात्॥तृतीयमनंतरोक्तकलपरक्रांतिसंबंधचापजात्यंद्वयमक्षक्रांतिसंबंधात्॥चेतिसाजात्याच्चतुष्पा
८२ त्तजात्यद्वयभुजद्वारातत्कर्णरूपेष्टाक्षापमज्ञानंसुबोधं॥स्वाक्षाल्पस्वक्रांतौक्रांतिक्षेत्रमक्षक्षेत्रांतर्गतं अधिकेत्वक्षक्षेत्रं
क्रांतिक्षेत्रांतर्गतं।स्वाक्षापमयोर्दिगैक्येत्वक्षक्षेत्रकोणाद्विषुवस्थिताद्बहिस्थक्रांतिक्षेत्रंतत्कोणाल्लग्नंस्यात्॥विषुवदृग्वृत्ते
कदंबद्वयांतःस्वरवृत्तेमाधीशाक्षदैक्यावृत्यंशांतरेणद्वृत्तयोःपरेलुप्यमंतरपरमा।उत्तरगोलेऽल्पकादृग्ज्यायांकुजोर्ध्वगाग्रह
स्यादिगंशानांसौम्यत्वेशोधितायाम्यत्वेयोधिताइष्टाक्षांशाःस्युरितिस्पष्टमेवदृग्गोलेऽक्षाल्पकक्रांतौ।तत्रदृग्वृत्तमुहो
रात्रवृत्तस्थानद्वयेकपालभेदेनसंलग्नमितिछायाद्वयंसुप्रसिद्धं।अधिकेपराल्पकस्वापमेतत्वेककपालएवस्थानद्वयेल
ग्नमितिछायाद्वयंतत्रापिसूक्ष्मतेकगम्यं॥परस्वल्पेस्वापमेतुतत्रस्थदृग्वृत्तदेशागतग्रहस्याहोरात्रवृत्तंतत्रैवसंलग्नेना
न्यत्रेतिछायैका।प्रत्यक्षप्रमाणावगताऽल्पकादृग्ज्यायां एतेनगोलस्वरूपमज्ञात्वैवबलात्तत्छायाद्वयप्रकारंवदंतोऽनि राम
मरांनिरस्ताःशेषवासनाफलतएवंस्फुटंस्यलंपल्लवितेन॥ ॥दृग्जीवयार्कगुणिताऽत्रदिग्ज्याभिज्याहृताल्पामितोभुजःस्या ८२
त्॥छायागुणात्तच्छ्रवणोद्धृताद्वादिग्ज्याभुजःसाभुजतोविलोमात्॥त्रिभज्ययाहृतात्कार्याग्रकाकर्णानिघ्नीभवेत्कर्णवृत्ताग्रका

ग्रस्तगोल॥पलछायपासौम्ययासंस्कृतास्याद्भुजोथोत्तरेभाग्रकेसौम्यगोले॥भुजःकर्णहृताग्रयायोन्यदासौविशुक्तो
दक्षभास्यात्तयावविशुक्तः॥भुजःसौम्याग्रेन्यदायाम्यस्त्रिभज्याहतःकर्णभक्तोग्रकाचापमौत्तः॥कर्णाग्रकासिद्धभुजस्य
वर्गछायाकृतेःशोध्यपदंततःस्यात्॥पूर्वापराकोटिरिहाथखेटःकपालकेपश्चिमपूर्वसंज्ञे॥अथात्रवृत्तं समभ्रमिष्टं का
येतुभवकककलाकितंव॥तत्केंद्रगाङ्कोवानिभार्कराकाःछायाप्रकंयत्रविरात्यपीति॥वृत्तेपरेश्रोत्रपकतो।दृष्टौमासत्कालदृ
ज्याग्रगतोभुजाया॥छायात्थकर्णनगुणाविभक्तोछायाप्रमाणेनतयोस्तुचापं॥एकान्यदिक्केनतदत्तेरक्ककलामिरेष्टा
चालितायनांशा॥वृत्तौस्फुटास्यात्खलुगोलयुक्त्यातत्स्मात्स्यतःस्याद्दिशियाम्यसौम्या॥मेषार्कसंदर्शनतोदिगंशांतरेपि
स्वापरस्तत्क्रमेव॥पद्धाधृवोप्येवसदैतराद्दिक्ज्ञेयान्यादिक्ज्ञानमतःसुबोधं॥अथैकभाग्राद्दपितस्समाप्यभ्रमोस्याद्दृग्वा
ऽमितांशाकर्का॥कोटीमितांशंकुतलाततथान्यास्वादिग्भवायत्रतदैक्य॥दृष्टाध्यरूपंपरिकल्प्यतस्मात्कोटिस्तु पूर्वापरस्त
त्ररूपा॥भुजस्तुयाम्योत्तरस्तत्स्वरूपस्तत्सर्वदिग्ज्ञानमतःसुबोधं× ग्रंथे× ॥सव्यंबकाद्येवसुशल्पविज्ञाःकुर्वंतिदिक्ज्ञा
नमिहान्यथैव॥पूर्वापरायाम्यकृताप्रकारैर्ज्ञेयाबुधेःसासममंडलीया॥अर्कोदयास्तजेपूर्वापरेतेग्र्याद्दिशादत॥अन्य
त्राल्पांतरात्केचिद्दृष्टांतेनतोजगुः॥आद्यप्रकारादयनाख्यसंधेरासन्नकालेयदिदिक्प्रसाध्या॥स्वल्पांतरान्नानुप

त॰वि॰ पत्तिरत्राहृकुसाधने संव्यवहारहेतोः॥ बिंबोर्ध्वदेशात्तरभाकरोनाद्दिक्सा धनैर्योर्व्विहतं न सत्तत॥ बिंबार्धयोर्हि प्रामितदृङ्
८३ तेनाद्दिनाधितः प्राक्परतोग्रहेन्द्रो॥ अभावएवास्तितृभाद्यस्य किंचिद्दिनाद्येत्तिवरवेटदृक्स्थ॥ तद्वीलितामेवामिहैकम
ध्यात्पूर्वापरस्थोपचयोनयस्मात्॥ दिक्सूत्रसंपातगतस्यशंकोश्छाया ग्रहपूर्वापरसूत्रमध्ये॥ दोर्दोःप्रभावर्गवियोगमूलं
कोटिर्निरास्राग्परातनःस्यात्॥ कर्णेकमर्कनरभाकोतियोगान्मूलमाछुरथभात्र बिलामात्॥ भूमिदृष्टजनरेणावे
भक्तादृग्ज्यकारविगुणास्फुटभावा॥ पत्स्वाकुदृष्टान्नरदृष्टिचिन्हाद्यावज्जबोद्दिवजगोलकेंदु॥ खगस्यातन्नभेसदृ
ष्टिसन्नंस्पष्टैवजाङ्गोलजदृष्टभग्ने॥ यज्ञंतुकाभंतद्दिहालिदृष्टदृक्सूत्रगतेसुधियाप्रसाध्ये॥ स्वल्पांतराद्वाव्यव
हारयोग्यसाध्येकुगर्भाभन्दृष्टिचिन्हात्॥ दृग्ज्यंदले गर्भकुजात्खगस्योन्नतांशकाःखान्नतभागकाश्च॥ येतज्ज्यके राम
येतन्नकर्णनिघ्नेत्रिज्याधृतेतेकिलयोजनाद्ये॥ स्वशंकुदृग्ज्ये भवतश्चतच्चतुर्भोकुरवंडप्रविद्धोध्यरोपं॥ दृष्टारव्यशं ८३
कुस्त्वथदृग्ज्यकानत्क्रयेर्युतिर्मूलमितंभवेत्तत्॥ गोप्यदक्षसूत्रमथास्यवर्गस्वयोजनव्यासदलस्यवर्गे॥ विशोध्य
मूलंकिलदृष्टजंतद्दृक्सूत्रकं गोलविदावगम्यं॥ बाणायदास्याद्रवखरस्यतस्याबिंबोर्द्ध्वरेखनतोन्नतांशाः॥ साध्याविव
द्दृग्भवस्त्वकतत्सर्वत्ररेबस्याऊणितोपसूत्रं॥ ऊर्ध्वाधरातथातिर्यग्रेखाचक्रस्यमध्यगा॥ कार्यास्त्रिकोणयस्ताभ्या

चत्वारःस्युःसमाइह॥ तदेकांगिस्वरूपाच्चयंत्रादेकस्यभाग्भवेत्॥ ज्ञानंदिग्देशकालानांतथास्पष्टमेवदाम्यहं॥ ग्रंथज्ञीवार्यरवे
डानित्रिंशांशत्रिंश्पाभिवान्यतः॥ रवाग्निसत्रिज्याप्रमाणेनलघुचाद्यंप्रमाहृतं॥ यंत्रंत्रिकोणकजाद्यंतस्यव्यासार्धरामितौ॥ भुजौ
तेषककेन्म्यांपिन्नसोवाकुलटतीयकः॥ तस्येकसमकोणाश्वतदन्यौविषमाकिल॥ समकोणवक्रकेंद्रविषमकोभवेत्कु
जं॥ तथान्यस्यात्खमध्यंतुकुजकेंद्रांतरेस्तिमः॥ तथारवमध्यकेंद्रात्खरेखानेमिगंतथा॥ वृत्तत्रयवशात्कुर्यात्कोष्ठके
द्वितयंबुधः॥ कुजात्रवाकलवानेम्यांतथारवांनिष्ठिनाडिकाः॥ समास्त्रिंशाद्विभागाश्चकार्याःक्रमेणतोज्यकाः॥ रवसंज्ञरे
रिवकप्रकुल्यांतरालानेमिलगाः॥ त्रिंशान्मिताःकुजारभ्यखांतंयत्रैकताबुधैः॥ अष्टादशांज्यकाङ्गजाड्यांतरालंगुलं
किता॥ तस्यांकुतोक्षभातुल्यांगुलाग्रकेद्रतोस्तियत्॥ लंबसूत्रंचलत्नेम्यांयत्रस्पृष्टंततःकुजं॥ यावदक्षाग्रकोस्तद्वत्खवया
कृत्वभागकाः॥ तयोःक्रमोत्क्रमज्येवज्ञेयेयांक्रमज्यका॥ अमीष्टान्तेकवानेम्योदयाश्चवात्त्रयाज्यका॥ क्रमौनत्केंद्वो
रतःक्रमज्यांगुलसंमिता॥ एवमिष्टाक्रमज्यावेकुजान्नेम्यांवृतेलगाः॥ देयाग्रदयागाज्जीवातत्कुजातोगुलांतिको॥ उ
क्ष मत्याभवेदत्रपदीसाध्यास्वदेशजा॥ परकोटक्रमज्याग्नीलंबज्याग्निज्ययाधृता॥ फलेनतत्रेनमोविस्याःस्वरस्थाने
यन्त्रयोष्टका॥ स्वादिगल्वानतेरुज्यासूलावात्येल्पयष्टिका॥ अयत्लपयातयाभाज्याःखरवांकाः१० स्यात्पराघकं॥

स·सि·
८४

नदंगुलैश्च सादीर्घा भुरेवर्धांगुलविस्तृता ॥ अग्रे वंगुलविस्ताराशंकार्य किंशलवंबवत् ॥ यथा तदेकपार्श्वस्था तथा केंद्रे नियोजये
त् ॥ ज्यां तरांगुलकं केंद्र केंद्राद्वक्याथ सा बुधैः ॥ नेम्यां कुजात्पलांशाग्रास्थितपद्यां च केंद्रतः ॥ यंत्रधृतज्याग्र दत्वा तज्ज्यायं नेम्यां
युपट्टिका ॥ ज्ञेयाथ सेषु भागांकितांगुलैर्नव केंद्रतः ॥ अपमाख्यं लिखेन्नाम्नि अत्र पट्टी कुजाग्रगा ॥ ज्याग्र यत्रास्ति तज्ज्या
नेम्या खादपमांशकाः ॥ फलभास्वीयविषुवच्छायातुल्या कुज्या भवेत्परा ॥ केंद्रांकुमौवर्ती दत्वा तज्जीवायत्र संस्पृशेत् ॥ कुजान्नेमि
गतं कोट्यंशाः कर्त्तापट्टिकांतनः ॥ केंद्रज्यावलंबत्पद्या स्वेष्टापरवरज्यका ॥ तृतीयं नतं वा भाक्ज्यास्थितपद्यां पुनश्चैतत् ॥ पंचकृप
रव रज्याया यत्र तज्ज्याग्र खांतरे ॥ नेम्यां मिष्वरांशास्युर्नाड्यः श्चज्यांगुलान्मितु ॥ सौम्यगोले चरं कन्या खात् बहिस्थं च दक्षिणे ।
तथांतरे नेम्यां तत्र ज्ञेयं चरात्मकं ॥ चलकोद्य पदस्यांशा नेम्यां खात्क्रमात्स्थ्य ॥ द्वितीयपदभागाद्यैः क्रमशो … जतस्तथा कु५ राम
॥ तृतीयं जायवतरस्तुर्यांश्च वादेया कुजात्तथा ॥ एवं भुजाग्र्यर्कनेम्यां … तथैव खाश्चेत् ॥ धातुजं दारुजं वाथ यंत्रं बुद्धिम
ता कृतं ॥ तस्य केंद्रे कुजो ध्वस्थे रंध्रे कार्य समांतरे ॥ भुजः स्थस्य केंद्ररंध्रगतं ग्रहे ॥ खस्थे विध्वाथ तद्यंत्रे कार्यं दृष्टवत् ८४
बुधैः ॥ मध्यकेंद्ररंध्रेण … जरंध्रं विशेयथा ॥ अर्के तेजस्तथा यंत्रं धार्यमर्कमुखं सदा ॥ अर्कोदये … तत्रं यथाय
था ॥ विंबांशयत्यर्के कुजस्थाना दुन्नतश्चात्र तथा तथा ॥ यंत्रे स नश्च तत्त्वं नेम्यं रंध्राश्मितं भवेत् ॥ अतः खादुन्नतांशाश्च

ज्ञेयाश्च जान्नतांशकाः ॥ तज्ज्यकेशंकुरुद्द्येव यंत्रे दृग्ज्या … ॥ स्वतेंनेशजीवाया युपट्टीयंत्र संस्पृशेत् ॥ गोलक्रमाद्यु
ज्यानयुतः कार्यो … कस्तु सः ॥ तस्य तुल्यमज्याग्रं पावंनेम्या खाद्यतः ॥ उन्नतनाडिकांशा कुजाद्वानतास्तथा ॥ नरज्या
नयुतकार्यो … त्यक्ता ॥ युपट्टीस्थानदृक्ज्या रवासौ वन तज्ज्यका ॥ दृग्ज्या नगात्दग्रे … भिगं रविं ॥ ततांस्व
स्वोन्नतांशाः स्युश्च कुजेया नतांशकाः ॥ नेम्यां कुजात्पलांशाग्रस्थितपद्या मिनज्यका ॥ यत्र स्पृष्टा नत केंद्रांतरे स्वेष्टहति
भवेत् ॥ एवं तत्पट्टिकायां खात्कोट्यंशाः ज्यका स्पृशेत् ॥ यत्र तत्केंद्रयोरंतः स्यात्यास्या दृक्पट्टिका ॥ रविचिन्हगतां कार्या ज
स्यामष्टादशी ज्यका ॥ यत्र तस्मात्क्रुवं यावत्छायाकेंद्रतुनश्रुतिः ॥ एवं खात्पलभागाग्रा स्थितपद्या च खात् … पमात ज्यका
यत्रासवे छिन्नतत् केंद्रातः समानरः ॥ … तत्पद्या छिन्नदृशज्यकाग्रगं ॥ सम … किंहं नेम्यां प्रकल्प
येत् ॥ शंकुभा कर्णनाद्या दिनतः सर्वं यथोक्तवत् ॥ एवं खात्समशंकोश्चपट्टीछाप्यापम … ज्यका ॥ खोगतानां स्पृशे
यत्र तत्केंद्रातः फलज्यका ॥ नतपद्यामेव याकेंद्रात्पलज्याग्रगत ज्यका ॥ तदग्र खांतरे नेम्यां कोट्यंशा वा स्वगोलजाः ५य
दासदो दिलहस्थिपरमं सन्नतोन्नतं ॥ द्विधा विधोन्नतांशेय दलपलफलांशकाः ॥ एवं मध्यनतांशानां कोत्वक्षांशाथ सवं
तिव ॥ यरतसं स्कारतो दोशाः कोवेशाश्च क्रमात्स्मृत ॥ एवं रतः क्रांतिभागांतर संज्ञ्यया स्पृशेत् ॥ ओनज्यामंडलं

न॰ वि॰ यत्रतत्रपदीन्मसेरखतः॥यावल्पष्टग्रकंनेम्यांचलार्कस्यभुजाराकाः॥रसन्नुज्यांऽपरांकल्प्यांप्रकल्प्यकरकर्मणा॥
यच्च॥त्रिज्ययोस्माखरखष्टवाविशोधिताः॥यष्टी स्याक्रमानेमपात्स्यकोटा युर्क्रमाचते॥उक्तवच्चरकेश्चेत्ही
८५ नाफ्काः क्रमोक्रमेः॥स्वोदयामेषषड्कस्यजूकालस्युर्विलोमलः॥ष्टष्टेयंत्रस्यनेम्यांतुलखाष्टनांत्रिपंचकं॥उदयार्थवे
संसाध्यकोष्टकानांचतुष्टयं॥आद्येखवन्हघटिकाद्वितीयेनलल्कानिव॥तृतीयेमेषषड्कस्यविभागाश्चैकभागके॥
त्रिंशल्लवाश्चतुर्थेतुजन्मामानिक्रमोक्रमात्॥वशार्कराशिभागेभ्योभीष्टकालाग्रगंभवेत्॥चलल्ग्नंचलाशानांच्य
स्तसंस्कारतोगकं॥चलल्ग्नार्कयोमध्येकालोप्येवस्फुटंभवेत्॥विबाणलंकुजोर्ध्वतुसाद्दिध्यायंत्रान्नतांवकान्
॥ज्ञात्वातत्रार्कवत्साध्यंयुगतंहीनयुक्चलल॥मध्यु■वकोसलक्ष्मातः कालेनोनाधिकेध्रुवे॥रात्रियातांविद्धशेयंचैव
मन्यदपीहवे॥सौम्यगोलेज्यकालाविल्सरनिवस्टरोतदा॥तत्क्रयकानुसारंवास्त्रत्रपट्टीक्योजयेत्॥षड्शाधिकम राम
चैकांगुलस्याचिन्हमकेज॥त्रिज्यंचचिन्हम■दारंगुलत्रैयसद्दा॥अथखात्पट्टिकाधृत्वेनहो॥केंद्रभुजांतरे॥नस्यां ८५
केंद्रात्तस्यचिन्हसत्क्रज्यायाचखावधि॥निम्यामेदफलंतेषांतोतत्कारतः स्फुटो॥जप्रियेयंत्रपातोचवंद्भजायाभु
जज्यका॥नवर्ग्रेद्भुशरः स्थूलः स्यात्सपातविघोदिद्दी॥अत्रदोः कोटिकर्णानांनामव्यासतोमिथः॥गणितफलसाम्यं
सं२

चनं
स्यात्तथाकार्यविचक्षणैः॥अनुपातप्रमाणंतत्फलमिछावत्सवे॥त्रिज्यातुल्यंप्रमाणंचेदिछातुल्यंचकेंद्रलः॥लिखेत्स्यैततो
नेम्यादत्वापट्टीच्चरोःखतः॥ठंतंपट्टांवसंलग्नंतज्यकाग्रखरेरक्योः॥मध्येत्विछाफलंज्ञेयमथवाकेंद्रतोलिखेत्॥लाप्य
ष्टेनेचखादिछाग्रगपट्टांतुतद्युतं॥यत्रतत्रज्यकाग्राच्चखरेखावधितद्भवेत्॥इछाफलंयदालायेद्यांत्रिज्यांशकेतरां॥
खेरखातत्प्रमाणाग्रेनेम्यांपट्टीन्यसेत्ततः॥भ्रमोकेंद्राग्निमज्यांबन्यंदलातज्याथपट्टिका॥यन्नलग्नेस्यांरतःपद्यामिछा
फलंभवेत्॥यदाकुत्रापिनात्रिज्यातदात्रिज्याप्रमाणतः॥लाप्यमिछात्स्वाकल्पातदेकंकेंद्रतोकयेत्॥पद्यामथतल्याग्रे
पट्टीस्थाप्यखतस्ततः॥त्रिज्याप्रमाणतश्चांकात्मागवदिछाफलंभवेत्॥अथयंत्रोन्नतांशानांविवित्र्येतादिहोच्यते॥यथारव
मध्यात्स्वभुजतथैवत्रसन्नतांशाध्वेगमंडलानि॥द्वयोर्द्वयोर्मध्यगतेयुरात्रखंडंसकोन्नतभागकालः॥तिर्यक्स्थितत्वे
समहान्ऋजुत्वेल्पकः कुजासन्नगतोयथास्यात्॥कालस्तथाकालजखंडकेनुऋजुत्वमेवंनिकटेकुजाद्व॥तथाल्पकःस्या
न्निकटेसदेवसर्वत्रदेवोदिविदृश्यतेन्हि॥सदानिरक्षेविषुवत्स्थितानांनतोरा कालः सम एव वेद्यः॥सिद्धांतेः क्षेत्रगोलत्र
वीजैर्यत्नाद्यत्प्रोक्तयुक्तिप्रकारैः॥अत्रावश्यंज्ञायतेवासनाग्निर्यत्रैःसूक्ष्मैरामयानोदितास्यात्॥दिग्देशकालोद्भव
जात्यजानीर्यञानुपातेर्गणितंमुसूक्ष्मं॥नदेप्रियंत्राग्नयकानित्रसामसर्वेमाश्चर्यकरंनृणांच॥कालादिदृक्वाजंकिंचिद्ग

~×द्गिनार्धात्॥तिर्यक्स्थितत्वंभवतीतिगोलेपत्यक्षासिद्धं किलतेनभानोः॥यंत्रोन्नतांशप्रभिवस्सकालोमहान्दि
नार्धात्निकटे×~

त॰वि॰
८८

णितंनादिहोदितं ॥ तत्सारमखिलंवक्ष्येग्रंथालंकारपेशलः ॥ ॥ इतिश्रीकमलाकरविरचितेसिद्धांततत्त्वविवेकेत्रिप्रश्नग
णिताधिकारः ॥ ७॥ ॥ अथदृक्कैवयद्बिंबस्वरूपंगणितेनसत् ॥ सूक्ष्मंस्वाभासनंबिंबविचारंकथ्यमान्यतः ॥ ग्रहदृग्ददिह
गोलायेतेतुलाहिंबगोलकाः ॥ आर्यभट्टव्याससमानंतुयोजनमंडलं ॥ तेजसांगोलकःसूर्योग्रहर्क्षाण्यंबुगोलकाः ॥ प्रभा
वंतोहिदृश्यंतेसूर्यरश्मिप्रदीपिताः ॥ इत्यंस्वानुभवाद्यार्यैःसत्यार्थज्ञैःकिलोदितं ॥ क्षितिजोर्ध्वगतादृश्याह्यदृश्यास्तदध
स्थिताः ॥ गोलेष्टमेतारकनीरगोलाःसदोज्वलाःसूर्यकरैःकिलग्रेः ॥ दिनेतुतत्सूर्यकरप्रदुष्टदृशानदृश्याःक्षितिदृग्गामी ॥
अथार्करश्म्युद्भवदोषनाशात्सर्वग्रहाभानिसहस्ररश्मेः ॥ सुदृष्टितःकानिचिदत्रदृश्यानिभसंस्थानृणांदिनेपि ॥ दृ
श्यानिरात्रौसुदृशातथैकंनैवक्वचिच्छुक्लोहिमरश्मिबिंबं ॥ किंतुग्रहाद्यंनकथंविलग्नंदृश्यंसुदृष्टेरभिघाततःस्यात् ॥ एवंहि
दूरांतरितोरवौहिकुजोर्ध्वसंस्थेहिदिवापितत्र ॥ रविःकुजास्तत्रयदुष्टबिंबंनरःपश्यतिनाहिवर्णं ॥ तदल्पदृग्दोषव
शाद्दृष्टैवंरवौतुयोम्याप्यालरश्मिसंस्थे ॥ तादृग्विधंवापिनपश्यतीथंदृक्तारतम्याद्धिबुधैर्विचार्यं ॥ ऊर्ध्वाधरत्वंपरिकल्प्य
रश्मोर्वशेनयःसप्रदृश्यरिंदुः ॥ सदोर्ध्वगोर्कस्तदधोस्त्यवश्यंव्यासौरतंचैश्वमपिप्रमाणं ॥ क्षितिप्रभानाहियुविंको
लच्छायानयानत्वंतदाटिबिन्हं ॥ प्रायस्तदर्कग्रहणेतितेनतत्रार्करश्म्युद्भवदृष्टिदोषः ॥ नैवातिशीलद्युतिनीरबिंबन

राम
८८

दर्शनाईसुदृशोतिनेंदुः ॥ रविंपिधत्तेनतथाहिशुक्रोसदैवयस्मान्नरदृष्टिचिन्हं ॥ कुदृष्टगंतज्जलबिंबगोलच्छायागतोवाग्रग
तयुतौहि ॥ प्रत्यक्षलक्ष्मणिनेनदृष्टंतयोरनल्पाहिसुनीरविबिंबं ॥ इत्थाकथंविद्रविराश्मिजातदृग्दोषतःपश्यतिनैवतत्रो ॥ दृ
ष्टिगुत्वग्रहणंविनापिकिलाहिसर्वैरविमंडलंहि ॥ ससर्वदापश्यतिसप्रभंतुसाछिद्रतालेननजायतेर्के ॥ एवंकदाचिच्छशि
बिंबगोलस्याग्राहिछिन्नरदृष्टिचिन्हं ॥ संदर्शनंतत्रकथंनराणांभवेद्धिसूर्यग्रहणेस्यचेत्थं ॥ नाशंकनीयंहियतोत्र
शुक्रबिंबान्महान्हिमरश्मिबिंबं ॥ स्वल्पाबाहिष्टरविबिंबभिंदुर्योगेवाहिभ्रमहद्दृष्टग्वाः ॥ स्वल्पार्कशोषान्नयनाभि
घातोल्पकोमहान्ह्यस्यामहतोनतूनं ॥ तेनेंदुयोगेतरणेःपिधानंसंदृश्यतेनैवनतथाहिदृग्वाः ॥ साछिद्रजास्याद्रविमंडले
तत्तेजःप्रभावाल्पतयाकदाचित् ॥ दृग्दोषनाशाद्गुरुसौम्यजासाचाल्पातनूपाकथितामुनींद्रैः ॥ इत्थंकिलोर्मिवलय
ग्रहश्रिन्शुक्रार्कदक्षतत्रजकेहियोगो ॥ तयोःपरस्थूलसुसूक्ष्मतापियथास्तियातानभवेत्तथैव ॥ जलाद्युपायेविरच
य्यसूर्यंनिरीक्ष्यमप्यत्यदृष्टांसरश्मं ॥ दृष्ट्वाधुनासप्तकनाःसितांशुबिंबंप्रतीतिंजनयानुलोके ॥ दूरांतरस्थोबुधमर्यंनिशा
यांतदुज्ज्वलंपश्यतियत्कुजार्थ्यं ॥ एवंग्रहायेर्कतदूर्ध्वगोलस्थिताःसदैवार्ककरोज्ज्वलास्ते ॥ तत्पूर्णबिंबत्वमतःसदैव
त्वधस्थयोश्चापिसितज्ञयोश्च ॥ समीपगार्कस्यचवक्रदीक्षाकालतःपक्षान्तयोस्तनतथाकृतोल्पो ॥ बिंबंचतेनोजलदर्शनीयं
बौसदैवमकुर्यग्रहगोलविज्ञाः ॥ रश्मियंराकेदूरगयोस्तयोश्चदृग्बिंबमानंसकलंनिशायां ॥ समुज्ज्वलत्वंकिरकिलेन्वे

त॰वि॰ ८७

दृष्टा सदा पश्यति चात्र यस्मात् ॥ एनेवंविधोस्त्यत्र भृगुज्ञबिंबा न्महत्कला बिंबमितिस्तथार्कात् ॥ कक्षावशाद्दूरगतश्च तत्
स्य रविः समंताद्भ्रमणं करोति ॥ बिलम्ब रव्यंशुमिरत्र शीघ्रस्यास्फुटं क्रमेणैव तु पूर्णशोभं ॥ शुक्रस्ततोस्याल्लिमिहोदितस्य बो
धनानि शंगीलक्षचेरिहैवं ॥ यन्नीरविबिंबराधिकं बलस्य यथा यथाल्पं च समीपगं च ॥ तथा तथा शोक्रमिति श्रुतस्याधिकात
ल्पाकं करैरधस्तात् ॥ भानोबिंबाद्भूर्भीया नितरां विकृष्टस्येत्तेजसत्वसंदेह ॥ आर्षे स्ताकं संविरोधेन तत्रे तत्पक्षो
यं मन्मते सुदेशान ॥ यस्मात्कालांशाल्पकांशांतरेर्क शुक्रज्ञौ कथं दृश्ययोग्यौ ॥ एकं कालांशाधिकांशांतरे पि शुक्रः
स्यान्नैव संदृश्यते न्हि ॥ तत्पक्षे नत्तेजसत्वास्फिरत्वे युक्तं स्यात् हेतुना किं न तत्र ॥ यद्युल्लांशोरंशुसंघप्रभावात् स्वल्पतेजो
दीपवन्नाशमेति ॥ यद्योगे यत्तेजसत्वं नाम मतं तद्वत्स्यात् कथं तत्र भं नौ ॥ एवं भेदे यच्च भागं कथं तत्रस्याद्योगेऽर्कशुक्रा
न प्रघातात् ॥ अर्के रश्मिप्रघातोस्ति नेत्रयोश्च महान्स्फुटौ ॥ अंतरे तत्वल्पकश्चैवं नृणां मनुभवायतः ॥ इत्थं सम्यक् हृद्य राम
तर्कतोत्र दोषस्त्वनायं तद्वस्तु एव ॥ व्यस्तं ह्यसिद्धान्तविरोधस्तु तत्तेजसत्वाच्च निनवीनवर्यो ॥ अथार्कांशुनिमग्नतेजसं ७
नैव दृश्यते ॥ किंतु सर्वं रवेर्बिंबं दृश्यतेत्रेति चेच्छृणु ॥ अर्कांशुरश्मिजं दृग्दोषात्तेजसं यास्त्वदृश्यता ॥ सुतोसौ भूमये
चैवप्रमाणापि दृतस्लिहा ॥ यच्चनीरमयागोलास्तेजोगोलादिश्च तः ॥ स्वल्पाः स्युः सर्वतः प्रोक्तेषामथौधिकाभवेत् ॥

कुदृष्टस्थैर्नेरगोलोनेत्राभ्यां दृश्यतेत्र च ॥ तद्वत्तनिमहानस्मि विशेषतस्तं च संशृणु ॥ अथैकनेत्रदृष्ट्या तु गोलोर्धो दृश्यते बुधैः ॥ त
दर्धाल्पं सदा दृश्यं दृष्टिसूत्रांतरास्थितं ॥ नेत्रांतरसमा व्यासा यस्य गोलस्य तस्य तु ॥ अर्धं संदृश्यते कोविदैः सूचनीयं न हृद्यात् ॥ त
त्राप्यल्पाधिकं चार्धं स्यादल्पे नेत्रयेन हृद्यात् ॥ नैव पश्यति गोलार्धं सम्यग्गिथं तं मं मतं ॥ यथा यथा दूरगतो गोलस्तस्य तथा
तथा ॥ दृश्यते वाधिको भागः परं त्वधोल्पको हि सः ॥ स्वतंत्रिकटत्वे तु ज्ञेयस्तद्विपरीत्यतः ॥ स्थूलत्वे चाणुबिंबत्वं दृश्यते च
तच्छृणु ॥ नेत्रगोलककेंद्रास्थदृष्टिसूत्राणि दहिने ॥ वस्तुग्रहणशक्तानि निर्गतानि बिंबगोलकः ॥ दृश्यस्तच्छायासमानं तु दृष्टि
सूत्रांतरं किल ॥ यथा यथा दूरगतो बिंबगोलस्तथा तथा ॥ दृष्टिसूत्रांतरस्वाल्पं निकटत्वेधिकं सदा ॥ स्वीयदृग्गोलरंतोस्या
तो नाणुस्थूलबिंबता ॥ दृष्टिसूत्रांतरा बिंबं दृश्यते नेत्रगोलको ॥ संकोचनतस्तयोः स्वल्पमसंकोचाधिकं ततः ॥ स्थूलत्वाणुत्व ह्य
भेदा हि बिंबास्त्रिविधः सदा ॥ दृग्दूरासन्नभावेन विकल्पद्वयं हितो यतः ॥ खमध्याद्यद्गोदिनज्योतिर्दिदोपतस्तथा ॥ तत्त
यथा तितरां न सवासन्नमथोच्यते ॥ बिंबीयगोलस्य च दृष्टभागे स्वाच्च पद्मकिरणाः स्वगोले ॥ अन्यास्तदंतर्गतगोलकलि
प्तास्ता एव तच्चोजन बिंबजाताः ॥ योजनात्मकबिंबस्य लिप्तिकाकरणा बुधैः ॥ स्थूलत्वं निकटेणुत्वं दूरे सम्यक् कृत्वा ॥ स्थूल किल
त्वाणुत्वहेतार्यत्वं वार्यः स्वकल्पितं ॥ ऊर्ध्वं तत्र मनं भूत्लिगोल्य वृत्तीर्विरोधनतः ॥ अथागमोक्तं स्वर्वाधश्चेत्रलाग्तातंगतं तमः ॥
नीलगोलास्थितं मध्ये भूमिश्च दृष्टगोलका ॥ भगोलात्तस्य लमो यस्त तत्स्समथार्ककरे सदा ॥ नष्टस्या च तद्धिंतुतद्भावा च य

न.वि.
८८

स्थितं॥ नीलांबरं सर्वजनप्रसिद्धं यत्स्यात्के द्रष्टा तिग्मरश्मिः॥ भगोलदृष्टो व्यगतं सदैव संदृश्यते भूनिगतैः सुरत्नं॥ यत्रानिशं
नारकरवेश्चरेद्भाश्चैकसंस्थाश्च भांतियातः॥ सनीलगोलः किल दर्शनार्थं भखेचराणां विहितो विरिंच्या॥ नीलोविनास्यात्र
यतानिघ्नतो नालपरदर्शनयोग्यमस्मात्॥ नदृष्टिसन्नांतरगं च बिंबगोलस्य खंडं किल बिंबसंज्ञं॥ दृष्टिं किंतदृक् बिंबगो
लकेंद्रतुल्यभुजदृष्टिसूत्रं॥ तद्धिबिंबगोलस्य च दृष्टभागे स्पष्टं समंतान्नरदृष्टिसूत्रं॥ तन्मार्गदृष्टिं परिधिस्तु बिंबे तद्धि स्फु
तिबिंबमितिं विदंति॥ तत्स्थदृष्टिजसूत्रमुक्तं चतुष्कं तत्स्थ बिंबमस्ति॥ तद्धि बिंबगोलस्य सूत्रस्य योगो यत्र स्थितं द्वि
जगोलगर्भात्॥ यदंतरं तत्खगबिंबगोलव्यासार्धतुल्यं भुजसंज्ञकं स्यात्॥ तत्स्थदृष्टिजसूत्रमत्र कोटिश्च तिर्यग्भुजदृ
ष्टिसूत्रं॥ दोःकोटियोगाच्छ्रवणः स्थितो यत् स्वल्पं मनागद्विगुणं हि बिंबं॥ तन्निबंधनं च॥ आद्योक्तयोजनमंडलार्धतत्स्थभ
दृक्सूत्रवियोगयोगौ॥ कार्यौ तु तद्घातपदेन चात्र द्विघ्नाहितद्योजनमंडलार्धं॥ तत्कर्णदृक्सूत्रहृतांघ्रिनिघ्नं खेगामिनां यो
जनबिंबमानं॥ परं तु विद् बिंबजगोलखंडं संदृश्यते न्याद्दृशा मंबरेत्तत्॥ दृक्सूत्रयोरंतरगं च न स्याद् तत् स्थदृग्भेदवशाद्धि भे
दात्॥ भूगोल नरदृष्टिबिंदु प्रकल्प्य पर्यग्गणितं सुखार्थं॥ अथ कुगर्भदृक्सूत्रेण स्वकक्षागोले कलात्मकर
बिंबानयनं॥ त्रिज्यागुणं योजनमंडलार्धं स्वयोजनाख्य स्फुटकर्णभक्तं॥ द्विनिघ्नतच्चापमितं ग्रहाणां स्पष्टकलाद्यं भवती राम
८८

रविबिंबं॥ अत्रोपपत्तिः श्रणु भूमिगर्भात् खबिंबगोलस्थितपृष्ठलग्नं॥ सूत्रं न मेरवेचरगोलदेशे स्यात्केकंतथा बिंबजगोलकेंद्रं॥ अन्य
च तद्बिंबजगोलपृष्ठलसत्सूत्रयोगाधिकेंद्रतः स्यात्॥ तद्व्यास खंडं भुजरूपमस्ति कोटिस्वरूपा किलदृष्टसूत्रात् भूगर्भकेंद्रदृष्ट
स्थितसूत्रयोर्यद् हस्यगोलविवरं कलाद्यं॥ आद्योक्तयोजनमंडलार्धं चापमितं युक्तियुतं सदैव॥ सार्वभौमकृतांकवृक्षगो
लांतः परिधौ स्थितं॥ पारखेचरबिंबगोलस्य खंडं बिंबतदेवाहुः॥ स्वीकर्तव्यं यित्यातन्नतत्सकपरिधौ मितं॥ कक्षा बिंबं स्वकीयाकार
सूत्रसमंतदसम्भवं॥ तद्बिंबकाक्षिकागोलकसुतौ न मितं तु बिंबजा॥ कर्णांतरे कुगर्भात्स्यान्ना हि तत्स्थदृष्टिजं॥ सूत्रं येनावत
द्विबंदृष्टियोग्यं यतो निशं॥ विनादृक्सूत्रनं बंधं दर्शनं न कथंचन॥ कुगर्भदृष्टिं किंतद्यद् बिंबगोलस्य मध्यगं॥ भूगर्भदृक्सूत्र
संज्ञं तत्कर्णतुल्यं भवेदिह॥ कर्णभुजस्तु सर्वाकला बिंबयोजनखंडकं॥ अत्रको टिस्तु कर्णास्यात् दृष्टदृक्सूत्रनसंमिता॥ तत्पृष्ठे
थ कुगर्भायदृष्टिं चिन्हवशाद्यपि॥ एवं दृक्सूत्रसिद्धिर्न कथंचिद्दृग्योग्यतातः॥ विधियुगोलार विणांमयाः कलाः स्वभागमिदं
पि सदैकरूपाः॥ नीचोच्चयोरंतरतश्चतेस्फुटतद्यासमानं तदपीह चैकं॥ दृग्याङ्मसर्वापिवशात्तु दृष्टं न्यूनाधिकत्वं गग
नेस्तितपां॥ नीचोच्चमध्येबहवः स्फुटाख्याः कक्षाश्चतद्योजनबिंबमेकं॥ सर्वत्र संस्थं किल तद्दर्शने कलात्मकास्तिस्मवाः
स्युर्बिंबं॥ यस्याश्च कक्षा महती तु तस्य स्वल्पाः कला योजनबिंबजाताः॥ यस्याल्पिका तत्र कलास्तु बह्व्यः सदैकतद्योजनबिं

ग·वि·
८८

बमानात्॥ स्फुटतद्वशादेवमवेदणुत्वं स्थूलत्वमूर्ध्वाधरसंस्थयातल्लु॥ यद्भास्कराचार्यैः सुगमं विहाय स्वार्थे विरोधाद्धि हितं प्रयासात्
॥ स्वच्छशादृष्टस्य कल्पनाप्यां कलादिशोभाहिका बिंबमानं॥ तद्युक्तिशून्यं खलु हन्त मे स्तैति यतोऽत्र तद्योजनालिप्तिकातः॥ स्फिटे
स्पष्टात्कालिका द्विबिंबमिवं रवीन्द्वोश्चनसयुतोत्र॥ यस्यार्धचापं हि गुणं न तस्यात्तच्चापतुल्यं गमितां कथंचित्॥ दृक्कर्णस्त्वज्या
ऽन्तरगेऽर्धचापे द्विघ्नेन तच्चापमिदं नदत्तः॥ सूर्येन्दुभूभात्तु योजनानीयनेन तामानकलास्तनुत्व॥ दृक्कर्णज्यान्तरगानाहि स्फु
स्फुटंथरीत्यातलथसार्वभौमे॥ प्रोक्तं नदप्पन्नसमयेत स्वसूर्येन्दुमेदृग्भवेण॥ हिनायाः॥ बिंबीयलिप्ताः किल बिंबसक्तकक्षा स्फि
ता निबकलोऽस्वतस्तुः॥ किंत्वन्यलिप्ताप्रमितस्तु बिंबं कलाधोधिष्ठ ययतः स्वबुध्या॥ बिंबस्य लिप्ता गुणभागजीवेत्यनेन माने
क्ष्यरूपं कृतिः॥ न तत्स्वकक्षाकलिकाप्रमाणा विधोः सदैवा मिच्चत्प्रमाणात्॥ नाम्नां स्वकक्षाकलिकाप्रमाणा केयं स्थिते
रानयने स्थितैः॥ सैकरूपा बिंबीयव्यासः कक्षाकलाप्रमाणात्॥ अन्यथा कल्पायितालप्तानारितामिदं जगत्॥ नीचोच्चबिंबी
यकलायथोक्ता कुभास्कराद्यैः शिततादिकानां॥ तथा रवीन्द्वोर्न कथं कलताः किं रवीन्दुवन्नेव कुजादिकानां॥ स्फुटस्वकक्षा राम
कलिकाप्रमाणा तदृग्योग्यबिंबीयकलायतः स्युः॥ फलाद्धि तल्लानयनं विना सयुक्तात्स्फलसूदृशो प्रमार्यैः॥ कुगर्भदृष्ट्य ८८
न्दुवशात्तथानासितान्यकर्णः कुजबिंबनिघ्नः॥ नत्वुक्तबिंबेन हताः फलस्याद्यदा रजोयोजनजातकर्णः॥ नराश्वसंख्यौ सिनोष्य

२१

बिंबलिप्ताः समा दृष्टिजसूत्रयुक्त्या॥ स्फुटस्पारनकृज्ञाकृणिमाननहीयंत दृश्विरो योवक्कृधाविदोच्यः॥ कुपृष्ठगेदृक्कस्वस्वशा
त्वगोलेदृक्कस्त्वज्यान्तरस्यैकमेव॥ मध्योदयान्तः क्षितिपृष्ठदृष्टि चिह्नाद्धि हि दोत्मितनदन्तरस्य॥ अतः कुपृष्ठस्थितदृग्वशान्तह
दृष्यादिबिंबं महदल्पकेन॥ नैव कुगर्भीयदृग्वशात्कथंचिद्यद्दृष्टिदोषात्कथयन्ति विद्याः॥ यत्स्वल्पमस्त्वथ क्षितिजोत्थमध्ययावाद्धतिमं
कलदृश्यबिंबं॥ यदाभितस्थानवनस्फुटेऽपि कपृष्ठदृक्कोन्स्वशात्सूक्ष्मं॥ स्पष्टाबिंबीयपृष्ठ्येयदृक्कराश्चांबरगाः॥ नदृग्
रेगोलविद ह्यस्य दृग्बिंबवासना॥ दृक्करालः स्थितं बिंबगोलखंडं तदेवाहि॥ दृश्यते तत्करान्तः स्थमहदाकारासंस्थितं॥ खमध्य
संस्थयहाबिंबगोलकेन्द्रं यतः कुलपृष्ठभागे॥ स्पृष्टाद्यऽर्धगानामयन रश्मपायेनीलांबरजनतथासमंतात्॥ लग्नाञ्चतनमंड
लसंमितं हि नीलांबरस्तस्य गवच्छबिंबं॥ दृग्यारश्मिमध्यात्स्थित बिंबगोलस्वरूपमेवाक्षितिगस्य दृश्यं॥ नदृष्टिचिन्हात्खका
बिंबगोलकेन्द्रान्तरं स्यात्किल दृष्टिसूत्रं॥ तस्मत्तद्गोलजपृष्ठलग्नं तन्नैकदृग्बिंबकेन्द्रमस्य॥ तत्केन्द्रचिन्हाबसमान्तरेण
सर्वत्रताह्वबिंबजनेमिरत्र॥ नैकरवमध्ये तत्स्फुरत्वे सम्यग्विराजच्छृणुतन्नवात॥ यदान्तस्वेचरबिंबगोलकेन्द्राद्धि दृग्
उलगं तदा स्यात्॥ तद्गोलपृष्ठाधरसस्थदेवाद्य स्वल्पवयत्रोर्ध्वगदृष्टिसूत्रं॥ नीलांबरसंमिलितं हि तत्र लघुस्थितं बिंब
जनेमिचिन्हे॥ दृश्यं तथोर्ध्वस्थितपृष्ठभागस्फुरं स्वयंमेहोनराज॥ दृश्यां हि तद्वोर्ध्वगबिंबनेमिचिन्हं न तद्धि निजह
ष्टकेन्द्रात्॥ तुल्यान्तरस्तोयतपोस्तु मध्यो बिंबस्य केन्द्रं सुधिया प्रकल्प्यं॥ नतकेन्द्रतश्चिन्हयुगान्तरेण स्फिततत्कलंतत्परिधिक्र

त·वि·
१०

क्रमेण॥ दृग्यश्मयोपी दृग्युग्भवंति तेनाल्पतद्वृत्तमितं हि बिंबं॥ रश्म्यंतरे संस्थितदृश्यबिंबं स्वरूपमेवास्ति महत्तथाल्पं॥ दृ
ग्योग्यनीलांबरगोलसंस्थं संदृश्यते भूमिगतैः सुवृत्तं॥ खमध्यसंस्थेल्पतरं सदैव महत्तथा स्वक्षितिजस्थिते स्यात्॥ त
दंतरे दृष्टिवशाद्विचित्रं तत्रैकरीत्यागणितं प्रवक्ष्ये॥ त्रिप्रश्नरीत्या खगबिंबगोलगर्भोद्भवे पृष्ठभवे च लाघवात्॥ कार्येह
दृक्कर्म चामिह ग्रहज्ञैः सुसूक्ष्मबिंबानयनप्रवीणैः॥ कुरवंडखेटश्रवणौ तु यस्य प्रकल्प्यौ चलसंज्ञितौ महीप्रमाणं॥ स्याद्
भेदकर्णस्तमिहास्य लंबो गर्भस्थलं बृहत्स्फुटस्त्वबुधैव तेन॥ याल्पा तयोस्त्रिज्यागुणितं खगस्य भोल्पावलं योजनमंडलार्धं॥
स्वपृष्ठदृक्सूत्रहतं च लब्धं भुजो भवेत्सुस्फुरणीयनृनं॥ ऋणात्मिका चेद्धनयात्मिका स्यात्तत्कर्णलंबो भुजयुक्तहीनः
अधःस्थितोर्ध्वस्थितपृष्ठदृष्टिसूत्रावलंबस्तु हि तिनिगर्भगं स्यात्॥ धनात्मिका चेद्विपरीतमुक्तात्क्षेप्यं हि तत्संगुणितं ख
गस्य॥ दृक्पृष्ठसूत्रं विहितं च गर्भदृक्सूत्रकेणात्तफलं द्विधा स्यात्॥ अथ स्थितोर्ध्वस्थितपृष्ठदृष्टिसूत्रे खलंबः किल
पृष्ठजः स्यात्॥ स्वलंबवर्गेण विहीनितस्य भकर्णवर्गस्य पदं हि यत्स्यात्॥ तत्स्वपृष्ठोत्थफलं प्रकल्प्यं यथात्र गर्भा
याविलंबवर्ग॥ भकर्णवर्गात्प्रविशोध्य शेषात्पदं युतानंतरभशभ्रकार्यं॥ धनर्णगाल्पावधयुपाचतत्र गर्भीयसूक्ष्मम
नेन निघ्नं॥ खेटस्य तद्योजनमंडलार्धं तत्रभदृक्सूत्रहतं च तत्स्यात्॥ भगोलजं योजनमंडलार्धमध्यस्थपृष्ठीयविलंबके
न॥ तत्युक्तमत्तं तु तदूर्ध्वजेन यत्स्याच्च तद्भूश्रवणात्थ कृत्यो॥ वियोगमूलांकलितात्स्वपृष्ठफलांतरं दृष्टिजमंतरं स्यात्॥ भि
गोलतद्योजन

राम
१०

मंडलार्धतेद्दृग्यो योगपदं विनिघ्नं॥ त्रिज्या यथास्वश्रवणोद्धृतं तद्दलस्य चापं द्विगुणं द्विधैवं॥ स्वपृष्ठदृक्सूत्रवशात्कलाद्यं तद्यो
गतुल्यं कलिकादि बिंबं॥ नक्षत्रकक्षाश्रितगोलके स्यात्संपूर्णचापप्रमितं तु भूये॥ तत्पूर्णजीवादलसंमितेन व्यासार्धमानेन कु
जं च वृत्तं॥ तद्वत्तु तुल्यं किल दृश्यबिंबं मध्यस्य केंद्रं सुधियो भकल्प्यं॥ तत्केंद्रजं दृष्टिजसूत्रकं यत्तद्बिंबगोलस्य च केंद्रलग्न
॥ तथैव तत्स्वाजदृष्टिसूत्र [illegible] केंद्रलग्नं॥ कथंचिदप्यत्र भवेत्खमध्यात्क्षितिजस्थितेन तिसुधीभिरूह्यं॥ ग्रहस्य
योजनमंडलार्धस्पष्टैव योजनकर्णमानं॥ मत्वा तदेवात्र भजं यथोक्ता यास्याज्ञितद्वा कलिकादिबिंबं॥ इत्थं खमध्या
दयभेदतस्सान्निध्यदूरस्थितभेदलक्ष्म॥ दृग्बिंबमान्यनयनात्सुसूक्ष्ममतोत्रतज्ज्ञौ खमप्यदोषः॥ यथायथा [illegible]
[illegible]णां दृक्क्षितिज मूर्ध्वगं॥ तथातथाधिकं बिंबमंबरे दृश्यते नृभिः॥ [illegible] मिलत्सुकेंद्रात्मतां कुरवंडखगदृष्टि
सूत्रे॥ ज्ञात्वा परीक्षां किल दृष्टितुल्या धनर्णगाल्पा बधयोगतो सिद्धिः॥ अनाव [illegible] मृणत्वं स्वीकृतं तु यत्॥ आबा
धायोगान्त सिध्येत्त्यतः पिततत्॥ इत्थं पदं [illegible] व्यवहारे सध्यै॥ कुजादिनाथेनाधिकाल्प
बिंबेतासकमात्प्रविणात्पथोक्ता॥ सांजतादिनमध्यार्धे दिनार्धे संफलेन तु॥ बिंबाद्विलिप्तमानानि तान्येषामंगुलानि तु॥
सम्यक्कृत्वापन्तुपातोत्र [illegible] ॥ ज्यनुपातात्रैरेरत्ननानिदिग्[illegible] लम्बुद्धतः॥ यथानामितोत्रमज्यारिग्धा

नाद्विधोः यो ह्यमस्ती हल्लप्रगुरुवेः॥ तथाभास्कराचार्यैः कमल्याविधानादलंवांतरं विंबजंनात्रितंहि॥ अभावेलभावंतुभा
वेथायविप्रदृष्टैवमध्यापियैवानयति॥ विलोमानुलोमव्ययात्रानुपातादयोग्यपितैयामस्ड्लोनमोस्तु॥ यदन्यरीत्याकवि
नास्वबुध्या ज्योतिर्विदाश्रीपतिनेवमुक्तंवृष्टामहीव्यासदलेनयस्मात्समुच्छ्रितं स्विष्टतिमपिपृष्ठे॥ नीभस्थमानोर्निकट
स्थतर्गां सुधास्फरस्तदृश्यमवेद्यतेसौ॥ पिधीयतेमात्रुवपुर्मयूखैः समंततः पंकजकर्णिकेव॥ तत्केसरैरंबरमध्यवर्तिनी
स्थितेलेनवस्तश्रमहर्तिः॥ वसुंधरागोलनिरुद्धधामादूरस्थितोयंसुखदत्रयाबिंबः॥ महीजदृष्टोपगतोविकस्यानतोमहात्
भात्यरुणोविरश्मिः॥ विदित्थमाधानयनेसुयुक्तिज्योतिर्विदांदृष्टिमिघातनो॥ तद्दृष्ट्याचार्यैस्तनेल्पकेनतस्वेलल
क्ष्यंकथमस्तिबिंबं॥ ग्रहणंपुनर्दृश्यविधिस्फुटत्वे कलेपतस्तनमतंहिरम्यं॥ भानैक्यखंडेविहतंपुराणैः स्वियर्थमर्कग्रहणं
रवीन्दोः॥ केंद्रांतरंतात्रहिनेमियोगेलः सूक्ष्मरीत्यातदहंप्रवक्ष्ये॥ अथार्धेस्वकक्षास्थगोलेसदैवरवेर्बिंबगोलोस्तिचैवं
विधोश्च॥ अधःस्वीयकक्षास्थगोलेस्तिगोलः सदाबिंबजस्त्वाचुतिःस्यात्कथंहि॥ अतोदृष्टिसूत्रेबुधैःकल्पितासातयोः
सूत्रयोरंतरस्वार्कगोलो॥ भवेद्विंबगोलस्यविस्तारतुल्यंरवेर्मंडलेचंद्रगोलेपितद्वत्॥ तयोःसूत्रयोरेवयच्चांतरंतद्रवेर्मंडलंयो
गास्थित्यैप्रकल्प्यं॥ तयोःसूत्रयोरे[illegible]तरंयोजनाख्यरवेःकक्षिकायांनतछीतरश्मेः॥ तयोर्मंडले दृष्टदृक्सूत्रकेतेल्पकाख्ये

प्रसाध्यैविधोः कक्षिकायां॥ अथस्पर्शकालेविमुक्तोकुगर्भात्कुपृष्ठाच्चयत्पृष्ठदृक्सूत्रमस्मात्परवेर्बिंबगोलस्यकेंद्रंतुलेयं
रवेर्मंडलार्धेनस्वेन्तिर्यक्॥ विधोर्बिंबगोलस्यकेंद्रंतुतद्रवेर्भिन्नदिक्स्वार्धतिमंडलेन॥ तदैक्यंतुकेंद्रांतरंचंद्रभान्वो
र्विस्तर्णजीवात्मकंस्वत्रमत्र॥ परदृष्टसूत्रद्वयोरकभेवयदानेमियोगस्थितंस्यात्तदेष॥ यदाबिंबगोलीयपृष्ठारव्यदृक्सु
त्रंवाभिन्नस्वेनतदान्त्यथैव॥ विधोःकक्षिकागोलसंस्थेंदुभान्वोर्मिवेतांचयेमंडलेतद्युतिर्हि॥ स्वतोनैवकिंतर्हिस्वदृक्सू
त्रयोगाद्भवेदेकगोलेपिचालक्ष्मकारात्॥ स्वदृष्टास्याबिंबैक्यचिन्हाच्चतिर्यक्स्वबिंबार्धतुल्यांतरेणस्वकेंद्रे॥ भुजो
त्रास्तिमानैक्यखंडस्वको॥ हिस्तयोः पृष्ठदृक्सूत्रयोरंतरांहि॥ तद्रुपक्षेत्रंर्धवापिद्विनिघ्नंरवीद्वोर्मिकेंद्रांतरंनेमियोगे॥ कु
गर्भैकदृक्सूत्रतः सार्वभौमैयदामंडलार्धसमेस्तस्ततानी॥ तयोःदृक्सूत्रेक्यतोमानयोगदलंबिंबकेंद्रांतरंप्रोक्तरी
त्या॥ यदानैवतुल्येरवींद्वोश्चबिंबेतदाविंबकेंद्रांतरेथंकस्तत्र॥ तयोर्मानयोगार्धतुल्यंनतत्रनसंगच्छतेसार्वभौमात्क
तस्मात्॥ मानैक्यखंडेनसमोहिकेंद्रांतरेणुनस्तत्रगनेमिजैक्यं॥ तद्दृक्कक्षागतनेमिजैक्यंनजायतेतद्युतितोपिलंबं॥
यतोहिकक्षागतनेमिजैक्येन्त्रग्रस्तंचताद्विकमुक्तयोगः॥ नार्कंद्रसूत्रांस्थितनेमिजात्तद्दृश्चनद्वेअपिदृश्ययोग्यो॥ स्व
दृग्युतोदृक्तनुनेमिजैक्यंहिलेवलकोलसुदृष्टयोगात्॥ येःस्वीकृतंबिंबदलैक्यरूपकेंद्रांतरंतन्नहिदर्शनार्हं॥ चंद्रकर्णाभि

त॰वि॰ कर्णाश्रयै रविकर्णं खगस्य च ॥ कर्णप्रकल्प्यपि तु अर्कखगादृक्सूत्रका दृप्तिः ॥ चंद्रगोलेपि सर्वत्र विभावर्येर्योजनमंडलं ॥ दृग्दृक्

९२ सूत्रकैकत्वात योस्तांत्रिज्यकाहते ॥ केंद्रकर्णाधृते फलं बिंबकेंद्रजसूत्रकं ॥ साध्यमानैक्यखंडं च तदेव परिकल्पयेत् ॥ कुसा

ध्यदृक्सूत्रजकल्पनां ता यत्केंद्रे तस्त्री रविणा तु स्वार्थी ॥ शीतांशुकक्षागतयो रिनेंदोः केंद्रांतरं मानदलैक्यमेव ॥ अत्रोपप

त्तिबोधार्थमिदं सर्वं विजानता ॥ गोलं ज्ञात्वा तु बिंबं यां दृश्यं स्वेत्रसांस्थितिं ॥ कुगर्भदृक्सूत्रकरेण मानैक्यखंडदर्शनं ॥

दृक्सूत्रयोगे शशि ॥ तिग्मरश्म्या बिंबीयगोलस्थितकेंद्रयोर्हि ॥ तयोश्च दृक्सूत्रवियोगरूपा द्वयं

तरादेव यदिंदुसाग्रो ॥ ग्रासाधिकाराद्धि हि तत् दृश्य दृष्टिचिन्हं किल नष्टदर्शनं ॥ चंद्रस्य बिंबं रविबिं

बतुल्यं भवेद्दृश्यान्यामिहान्यथा न ॥ पूर्णग्रहार्कस्य भवेद्धि मार्गः ग्रासाग्रदृक्सूत्रकयोः समत्वात्

॥ दृक्सूत्रमल्पं यदि मार्गमानं न ग्रासोर्ध तल्लक्ष दृष्टिचिन्हं ॥ बिंबाधिकलाद्रवितो विधोश्च ख

स्थग्रहस्तत्र बुधो विचिंत्य ॥ भागाधिकं दृष्टिजसूत्रकं चेद्ग्रासाद्धि तस्मिन्नरदृष्टिचिन्हं ॥ तत्रोल

स्सर्वलेय ग्रहः स्याद्दल्पस्ततो कांठरि ॥ बिंबकस्य निवान्यथैव किंचिद्बिंबलक्ष्मदृक्क्षेत्ररीया ॥ राम

सुधिया विचार्य ॥ एवं यदानीं च समं स्थितार्कः स्वांबिंथ तद्ग्राशि गए क्वचिद्धि ॥ तदा सदालेह्यलयार्कं ९२

तेश्च नंबुधेंदुः परमत्वमूर्यं ॥ तदा हि दृक्सूत्रवशात् ग्रहदृक्सूत्री त्या विपरत्वमेवं ॥ विचित्रदृक्सूत्रवशात्कथं चिन्न ज्ञायते

बिंबसंपूरीतं ॥ आसन्नत्व कुपृष्ठ बामध्ये तीव्राः कराः खेः ॥ दूरस्थत्वान्न दन्या स्मिन्नभावाल्पद्युतिस्फुटं ॥ अथ ज्योतिर्मयं

खेटबिंबं यतद्दृश्यते ल्पकं ॥ तेददोषात् सदा तस्य न्यूनत्वेवाधिकं वतत ॥ स्थूलं तरं यत्तदोषस्त सूक्ष्मतरं विजानता ॥ रविणा

नियमो वस्तु तत् स्यादनुगोख्यसः ॥ ॥ अथ ग्रहबिंबदर्शनं नक्षत्रबिंबज्ञाने ॥ यच्चयत्र खेटसमे भगोले संदृश्यते योजनखे

टबिंबं ॥ तत्कर्णनिघ्नं निजकर्णभक्तं तत्स्यात्स्वबिंबं किल योजनाद्यं ॥ परं तु यत्र विहाय कर्णं कर्तं च दृक्सूत्रवशादि दंवत

॥ तन्निपितत्सूक्ष्मत स्व बोध्यमेवं समाबिंबसाति खेटबिंबात् ॥ अर्धत्रिभागं यदिमतेन तथाद्या ॥ द २ । ७ । ० भ्रमेता द्विहलं गुणं च

॥ भजेबतत्वाजन बिंबकस्यात्तत्खगोले न्यूनत्वं न समत ॥ खेटयपी यतु मिथः प्रकल्प्य साम्यादि दृश्यादि बियोजनाद्य ॥

स्वाचापिनिरिपतेद्बिंबं वा द्विबकर्णैः खगजोयथार्थौ ॥ खमध्यस्थ्य यो तदन्युंक्द्रास्थयोः सूक्ष्मतरं लिहं तत्तदाद्विकः

॥ तयोर्मध्यात् जातं रविबिंबस्त्सूक्ष्मेप्रभेदादस्सूक्ष्मं यतश्चामनंति ॥ दृष्टा दृश्यस्थे यौ सर्वमन्त्री नाबरे ग्रहे ॥ खचरा द्विस्यं तत

त्रावश्यं पश्यति मानवः ॥ खगद्वयं चैकरकोनरो यत्र पश्यति स्वीय विलोचनात्या ॥ संदर्शनात्तद्धि न वेक दृश्या तद्धासनायु

क्तियुतां प्रवच्मि ॥ सत्यंतर पीह खगा विलोको यस्याग्रयेणेव तदंबरे च ॥ परस्परं वेग्रहसक्तदृष्टि द्वयो यथा स्त्र नेवा विभिन्ना दि

१ लग्नेष्वथवाथतयोर्विप्रियद्ग्रहदर्पंपश्यति तत्र नूनं॥ ग्रहो यदृक्ष्वरवयोगविन्देयतो यवश्यं स्वचरो न दृश्यः

त॰वि॰ दृश्यौ पृथग्दृष्टिसत्त्वे रवचरो नित्यदृश्यो यः स्वेथ तं पश्यति नान्य दृष्ट्या॥ एवं नराब्दयस्त्वभेदाद्दृष्टिवैपरीत्यादवलोकयंति॥ ॥इ

९३ ति श्रीकमलाकरविरचिते सिद्धान्ततत्त्वविवेके बिंबाधिकारः॥ ॥यथैव विलद्दृक्किरणावरोधसंभवो रविस्तु सूर्यस्य करावरोधः।

भपूर्वस्य यदि चांतरस्थे द्युर्कयोरल्पालिकल्पतश्च दृश्य॥ बिंबस्येत्तत्र तूर्णातदर्ककरावृत तद्गलगतियस्मात॥ अतः स्वकसिद्ध

इहाधिकाराद्दृग्गोचरोर्कस्य करावरोधात्॥ यथा करावरोधेन व्यक्तोयः करमध्यगः॥ बिंबाराध्याभतस्त्राण्नज्ञेयो भास्व

रकोत्रसः॥ अर्कतो यत्त्वल्पकोगोलस्तच्छाया विस्तृतिर्भवेत्॥ उत्तरोत्तरमभ्यासाद्दधिकस्याधिकास्मृता॥ यथ कोल्पककुगो

लस्यच्छायादैर्घ्यं प्रसाधितं॥ तथैवं ग्रहविंबीय गोलदादैर्घ्यमानयेत्॥ ग्रहस्य ययोजनमंडलार्धग्रहार्कबिंबांतरसूत्रनिघ्नं

॥ भकांतयोर्योजनमंडलार्धांतरेण तत्स्यात्खगभाग्रदैर्घ्यं॥ यत्त्वस्वगोलस्थितखेटभाग्चो बिंबीयगोलेऽवकेंद्रसूत्रे॥ प्रसि

द्धतद्योजनसंख्ययास्याद्भामित्यसेतत्कथयामिसूक्ष्मं॥ ग्रहार्कयोरंतरकोटिजीवाग्रहेषुकोट्यिकयाविनिघ्नौ॥ त्रिज्योद्धृ

तास्यात्फलसिंजिनीतच्चापफलं तद्युतहीनखाकाः॥ स्फुटंग्रहार्कांतरमाधपादेमार्धराशिद्वाग्रपदे द्वितीये॥ तृतीयके भार्ध राम

लवे १८० युतास्ते चक्रांशशुद्धाश्चपदे चतुर्थे॥ ग्रहार्कयोस्तद्द्विवरस्फुटारव्यं ग्रहार्कबिंबोर्ध्वगमंडलेहि॥ फलस्य कोट्यो वि ९३

वरेण वार्त्ये ग्रहार्कयोरंतरकेयुतोनं॥ पदविधेयो विषमेसमेचक्रमार्द्रहर्कांतरकंस्फुटंस्यात्॥ ग्रहार्कयोः स्पष्टवियोगजी

२ ग्रहार्कयोर्मद्विवरयभागाः स्वाम्युधृताः स्याद्भहमर्कांतर॥ २

वाग्रहस्य कर्णेन गुणा विभक्ता॥ त्रिज्यया लब्धमितो भुजः स्याद्वेपलज्या ग्रहकर्णनिघ्नी॥ त्रिज्योद्धृतातत्सहितो विहीनस्त्रि

ज्यांशुकर्णः कथितात्र कोटिः॥ स्पष्टाभिधे कर्किमृगादिषट्के ग्रहार्कयोस्तद्द्विवरस्थकर्णः॥ तद्दृग्योगस्य पदस्य कक्षागोलरवयोः

खचरतीक्ष्णभान्वोः॥ स्याद्यत्र तत्रास्ति तयोश्च बिंबकेंद्रांतरयोजनसूत्ररूपः॥ भार्धोक्षयोरानयनाय पूर्वैनोदाहृता यः खचर

स्य चैव॥ विलग्नात्खेचरतः स सूक्ष्म गोलाभयत्वं हि मता सुसाधैः॥ इत्थं यदुक्तं रविकक्षाकांतरस्थयस्थितानां नलथोर्ध्वग

नां॥ खेटार्कयोर्व्यत्ययतश्च बोध्यं यथोक्ततद्विवियोगसूत्रं॥ अथान्यथा वा कथयामि सम्यक्तद्ग्रहार्कबिंबांतरसूत्र युक्तं

॥ याम्योत्तरावत्र भुजो स्तु कोटिः पूर्वापरे मंडलतो रवीद्धाः॥ स्वकर्णनिघ्नौ त्रिगुणोद्धृतेनेस्व बाहुकोटी विलयोजनाद्यौ॥

कार्ये च तुल्यान्यदिशोः क्रमेण बाह्वोश्च कोट्योश्च वियोगयोगौ॥ स्फुटेचतेस्तः खलु बाहुकोटी चंद्रार्कयोर्मध्यगतेत्रनू

नं॥ कार्यं तयोर्वर्गयुतेश्च मूलमाद्याभिधं चैवमिनं दुरीक्ष॥ स्वकर्णनिघ्नो त्रिगुणोद्धृतोत्र योजनाद्योमवलत्त्वयोत्र॥

उर्ध्वाधरेकान्यादिशोः क्रमेण वियोगयोगाद्भवतीह चान्यः॥ तयोश्च वर्गैक्यपदं स कर्ण इहार्कबिंबांतरसूत्ररूपः॥ यद

र्थमज्ञानवशाद्भमंति स्वत्वाभिमानाद्गहगोलविज्ञाः॥ यद्बिंबगोलकेंद्रार्थं सूत्रं रवेराकयोरिह॥ अनल्पेसर्वदैवास्या

त्कर्णांतरतोऽधिततर॥ ग्रहार्कबिंबांतरसूत्रमुक्तं भासिद्धिदं तच्च यथा यथाल्पं॥ तथा तथाल्पा ग्रहबिंबगोलछाया।

त. त्रि. धिकत्वे लाधिकासदृश्यं ॥ अथ थाकीमध्यकर्णप्रमाणेन भूछायादैर्घ्यं २२३८७ एवमुच्चकर्णप्रमाणेन २३२१२० एवं नीच
९४ कर्णप्रमाणेन २१५५८१ एवं चंद्रस्य कर्णा मध्यकक्षाप्रमाणेन कृवृशेन कर्णांतरसमाविककेंद्रांतरस्त्रैकमेण छाया
दैर्घ्याणि लिख्यते ॥ चं ५०५२२ उ ५१५२८ नी ४९६८२ एवं नीचास्थितेरवीतद्वाशिग एवं विधुस्तत्र गतस्तत्रैव छायादैर्घ्यं च ।
४९०७४ ॥ ॥ रवमध्यगो बिंबकेंद्रगोलकेंद्रपागा युदास्त ः ग्राग्रा तिमरश्मी ॥ तदेतु माया ग्रासितस्वं डहान निजस्फुलेरल्पात
रंत्वात्र ॥ सिवे कुपृष्ठोर्ध्वगा मिंदुभाग्रं भामंडलं चेदाधिकं पृथिव्या ॥ एवं स्वमध्यादितरत्र भाग्रदृक्सूत्रकार्या सुधिया वि
चार्य ॥ आर्षा विरोधतो गर्भात्रिप्रश्ने या प्रभोदिता ॥ तदसूक्ष्मत्वतः पूर्वैः कथिता सा तदन्यथा ॥ स्वभास्फुटितिर्यग्विवाजि
तो नाम्हनल्पः खाग्निकेशहीनः ॥ स्पष्टा भवेद्स्फुटजात दृज्यासंताडितार्कैः स्फुटशंकुभक्ता ॥ प्रभा भवेत्रा तिथिभा
गतोन्या या वाह्रिपुत्ताव×तां×दसाव दृश्यः ॥ दृश्यप्रभासाधनमुक्तमेवं शिरोमणौ स्वाक्षितिदृष्टशंको ः । कुगर्भगत्वादृश्य राम
यार्धतुल्यं वीक्रमेणयो ॥ स्वाविंबखंडलितिकयुगो नितैज्यकेनयुगे । दृश्यनतो दृग्ज्यका स्त्य निघ्नी भूराशिनस्त्वेन भाक्त ९४
ख्यासक्ता ॥ प्रभादर्शनीया ततोमाप्टाति ः स्यात्कुपृष्ठस्वं बिंबार्ध्वनामिप्रजाता ॥ कुच्छन्न[illegible]सत्राकलवेनानिघ्नी दृष्टप्र
भा दृष्टभयायुता स्याः ॥ कुच्छन्नस्वार्कयुतेस्त्ववर्गयोगात्पदं तद्धिता निभज्या ॥ कुच्छन्नसत्रार्कयुतिः प्रगुण्यास्याप्ता

पभागराहिता निजेन ॥ बिंबस्वखंडेनततोऽपकासो गतो मेघीष्टनरो तमस्स ः ॥ इत्यमुक्तं हसितु लस्ताविभो मेस्वयुक्तितः ॥
रगनाष्मालसेना या द्विनसहेनरीतिन ः ॥ रविरश्म्येवरोधात्रलंबास्फातिसिद्ध ः क्षितिदृष्टगाकर्णकोः ॥ स्फुटस्मात्र विनिप्रमा
णमस्या ः कथयामि प्रभमानुसारमत्र ॥ त्रिप्रश्नीयाप्रथमप्रसाध्यलंबाइल ख्याकजिशंकुदृग्ज्ये ॥ कुच्छन्नस्त्वेणनिजे
नेहीन ः सगर्भशंकुर्निजपृष्ठजात ॥ रवेस्तु पृष्ठरव्यनरो थ शंकुदृग्ज्यान्त मानयनायथायोग्ये ॥ रविप्रदृज्याविहीन
पृष्ठनरेण भक्ता कर्णनरप्रभास्यात् ॥ दृश्याकुपृष्ठीयनृणां तदर्कवर्गैक्यमूलं किलभाश्रुतिः स्यात् ॥ इत्यंतातं बिंबजकेंद्र
तशंकयसक्ता र्ककरांतरेण ॥ अत्रोपपत्तिं बोधार्थं पृथिवीमपवर्त्तितां ॥ कुर्यादर्कस्य कक्षां च तथा तद्वृत्तमध्यगं ॥ तिर्यक्सूत्रं च
गर्भीयकुजसूत्रं तथोर्ध्वगं ॥ कुर्यान्मध्यासिपंतं च यत्र लग्नं कुमंडले ॥ कुपृष्ठं तन्नाकिं तैयं तत्र रव्यंगुलोनरः ॥ तथा कुपृष्ठत
स्तिर्यग्गर्भात्सितिजसूत्रतः ॥ समांतरेण यत्सूत्रं पृष्ठसितिसंज्ञकं ॥ स्वीयकक्षागतार्कस्य बिंबकेंद्रान्नरायतः ॥ सूत्रकर्णा
ख्यं कुर्यात्स्वीयपृष्ठकुजावधि ॥ तत्र यत्कुमूलस्य कर्णसूत्रस्य चांतरं ॥ पृष्ठछायातथाकर्णः छायाशंकगास्त्विह ॥ स्य
मत्र प्रतीत्यर्थं छायाक्षेत्रस्य दर्शनं ॥ सार्वभौमशिरोमण्योः कुपृष्ठादर्कसंगतं ॥ सूत्रं कर्णभुजो दृग्ज्या कोटिः पृष्ठस्फुटो
नरः ॥ दृष्टछायान्यजातीयं जात्येमुक्तमिदं तथा ॥ पूर्वोक्तादंतिलक्ष्मार्थं दृष्टछायानुपातनः ॥ कुच्छन्नसूत्रजजात्यं तयोगनात

ग॰वि॰ तीयके॥ जात्यंतदनुपाताद्वर्गाः शंकुप्रसाधनं॥ तत्तत्तदप्यसद्विवोर्ध्वाधस्त्रकुजावधि॥ यत्तत्रिज्यां गृहीत्वैव नाशितं गो
९५ रवाद्वनतः॥ विजातीयानुपातोऽयं यदभीष्टं च तन्मतं॥ दृष्टभासित्रतत्वेन नकचर्थं लाघवाकृतः॥ कर्णस्य वर्गो द्विगुणः कुरवं
वर्गाणितस्तस्य पदं विहीनं॥ कुरवं केन त्रिगुणार्धनिघ्नकर्णात्यंतस्य धनुर्नतांशाः॥ यदा रवेस्यु नरभानरेण समानदृ
भास्कर सूर्यकोत्तया॥ कुपृष्ठजस्पष्टनरोऽस्फुटोऽथ दृश्यासमस्तत्रयनो भिन्नः॥ कुपृष्ठगाल्पस्य
नरस्य चाग्रस्पृष्ठायदर्को किलकर्णसूत्रे॥ समक्षितौ यत्र विलंबमस्मात्तच्छंकुमूलावधितत्रभा
स्यात्॥ दृश्यार्थसा नैव नरेण तुल्या कथं यतत्तद्गणितं सुसूक्ष्मं॥ छायोऽवक्षेत्रसुसूक्ष्मतत्वावि
चारणज्ञस्य मतो भिन्नः॥ वस्तुतस्तु धरणीसमतलेऽभिन्नो भिन्नन रभानरभेदात्॥ आत्तनिश्चित
मिहादितदृश्यतात्रजानितजायाविशिष्टैः॥ लघ्वतल्पनरजात्यनरेण नैव सा न खलु किंतु समैव॥ राम
ह्रस्वदीर्घनरमानविभेदेप्यत्र तेन रविसंख्याविभागः॥ तुल्यतामुपगताः सततं ते ये च भानयनमुक ९५
वक्त्र॥ तुल्यमप्यथसुसूक्ष्मतत्त्वजात्यमिदलरहाशिविभिन्नं॥ दकृशंकुतद्वयोः संख्याप्रसि
द्धायेनमानतः॥ नैवलेनाल्पशंकोश्च संख्यातत्र कथं तयोः॥ वियोगयोगोयुक्तो नलजेपनव सकथं॥ सिद्धांततल

यद्दतां नराणां सूक्ष्मपक्षतः अतस्तृतीयपक्षोऽनंसाकिंमोमोदितं च यत्॥ कृष्णार्कयुलेस्त्वव्यस्यां सस्त्वेनरी तितः॥ अयमल्पन
रभेदविच्छायाभिदा न कथ्यते॥ दृष्टभा अथ मतः सूक्ष्मसाधनताभास्करोदिते॥ अनयोश्च यास्फुटत्वार्थमिथ युक्तः सतां सद्गणि
तपर्वणः॥ कुपृष्ठतो मानयनं सुखात्स नेत्रस्य दृक्स्वेनरदर्शनार्थी॥ आर्षैः साकविरोधनोविंबपृष्ठोर्ध्वदेशतः॥ भानीतासा
वेतामेनादूनाद्भ्रष्टरथादर्शादि॥ वस्तुतः स्वेष्टशंकोः समूलं समक्षितिपृष्ठगं॥ तन्मतेतन्तत्रास्तियत्र चास्तिह तन्नरः॥ त
दृष्टभानरो नैव कुकेंद्राभिमुखो भवेत्॥ कुपृष्ठमेवतत्पृष्ठे छायाग्रंवतदयतः॥ विंबपृष्ठोर्ध्वदेशांलुपृष्ठा स्त्वं च यज्ञत॥
तत्स्पष्टत्वप्रदेशावयकरार्कस्य विद्यते॥ छायास्वत्वासिद्ध्यर्थ एव स एवानोपयुज्यते॥ नान्यः स चोर्ध्वदेशास्तु वास्तवश्चा
थतन्मते॥ नायं किंतु स्वकक्षास्थप्रदेशो विंबनामिजः॥ दृष्टदृक्स्वत्वतश्चायं नाहि सिध्यति सूक्ष्मतः॥ यतः कुपृष्ठकाग्राच्च द्धि
बगोलस्य मध्यगं॥ गर्भदृक्सूत्रकं तस्याद्देवस्तस्य साधनं॥ दृक्कर्णतुदृक्स्यये वेर्ग्युतिम्लेभवादितः॥ गर्भदृक्सूत्रकंत
स्यातदृग्रावविशोधयेत्॥ अर्कविंबीयगोलस्य व्यासार्धकलिकाकृति॥ तन्मूलं दृष्टदृक्सूत्रं कुपृष्ठाद्विंबपृष्ठगं॥ तान्मि
तां तन्मते नैव यच्चतत्पक्षतो स्तितव॥ वक्षास्थानात्कथं विन्नस्वीयाभदृष्टगं भवेत्॥ सुस्त एवार्थप्रहतानां सुचितं तत्क
थं भवेत्॥ अतस्तस्यार्ध्वदेशस्थाकिरणाय गतास्त्विह॥ तच्छायानयनं दुष्टं दृष्टराश्मिवाहिर्गतं॥ किंचविंबोर्ध्वदेशास्तु

न.वि. ९८ खमध्येऽस्ति यदा तदा ॥ अभाव एव मतोऽप्याया: कदाचिन्मध्यतः सच ॥ प्राक्पश्चात्सद्भवेद्यत्र तेनैव मानयनं क्वचित् ॥ खदलेनत
भागाश्चेद्द्विंबार्धाल्पा रवेस्तदा ॥ तत्र बिंबोर्ध्वदेशास्तु द्विवारं हि खमध्यगः ॥ दिनार्धेर्कनतांशा वा बिंबार्धाल्पनतांशका ॥ मध्या
ह्नमयतो यस्मा द्विंबार्धनतसंभवः ॥ खमध्ये बिंबकेंद्रं चेच्छायाऽभावोऽस्ति नु सदा ॥ तदीया संभवो नापाः कथं तद्ज्ञापसाध
नं ॥ यावत्कद्दी तितेश्छायासा चार्कि द्विभवा स्मृता ॥ शंकुग्रात्सर्वबिंबोर्ध्वदेशानां च समत्वतः ॥ परस्परविरोधेन तदेका
निश्चया किल ॥ अभाव एव तद्ज्ञत्या: स्वीकार्या तत्र धीमता ॥ ॥ अथ शंकग्रतः तत्र बिंबगोलस्य मध्यगं ॥ जातु तज्ज्ञोऽस्फुट
दृस्या यत्र लक्ष्यं स एव हि ॥ गोलार्धाल्पका बिंबस्य मध्यदेशोत्र कल्पते ॥ ततः शंक्वग्रगो नो स्पृष्टो मध्यकरैश्च संनीर
वेशांकग्रतः स्वं गोल एषे स्पृशऊतं ॥ समंततश्च तत्स्पृष्टे जातं यद्बिंबनेमिजं ॥ मंडलं तद्ज्ञ तायेच करास्तेषां च मध्यजात्वा ॥ द
रत्वा तत्प्रभावोऽल्पस्तेन मध्यकरस्य च ॥ सामर्थ्याधिक्यतस्तत्र छायातद्दर्शतो भवेत् ॥ नान्यात्तदूर्ध्वदेशात्स्या दन्यथात् राम
पपत्तिभ ॥ एवमूर्ध्वैकदेशात्तुल्यत्का सर्वहि मंडलं ॥ मेघाछन्नं तदा तत्र तद्देशाद्भवरश्मितः ॥ शंकुच्छिन्ना भवेन्नान्या द्दिश्यं प्रत्य ९८
क्षतः स्फुटं ॥ एवं तिर्यगधो देशा द्बिंबनेमिस्थितादपि ॥ तिर्यगूर्ध्वानुगामास्याल्लाङ्कना नुक्रमा किल ॥ आसन्नबलेनमध्य
गायाभावेन्यभा त्विय ॥ अतो बिंबकुमध्यस्थ सूत्रमध्यस्थ चानुसारतः ॥ तदूर्ध्वनेमिजैः सर्वैः करैरेव कुभा भवेत् ॥ गोलज्ञ

वर्गगणसंसदि संस्थितानां नैवोचितं यद्द्विगोलविरोधासितं ॥ तत्रार्षगोलजनिता द्विविरुद्धमार्यैस्त्याज्यं सदैव निजाभि
मतसन्निबंधा ॥ ॥ इति श्रीकमलाकरविरचिते सिद्धांततत्त्वविवेके छायाधिकारः ॥ ॥ स्वतस्तेजःप्रसादर्कगोलात्सदा
स्या विधो निरगोलो ऽर्करश्म्यन्तरे यः ॥ सहस्रांशुदृश्यस्य चार्धाधिकं यद्भवेदुज्ज्वलं स्वोर्ध्वतद्रश्मिसंगैः ॥ तदर्धाल्पकं वा
न्यदिंदोः करैर्बेयऽस्त्वशुक्लं स्वभासातः स्थितं सर्वदैव ॥ सितं वासितं बाध्यमल्पत्वकानात्तदन्याम्बुगोलात्मकानामपीत्थं ॥ अ
मांते विधोरूर्ध्वखंडं सितं स्याद्रवेरेकराश्यंशलिप्तादियोगात् ॥ अधः संस्थितं वासितं रश्म्ययोगादथैवं रवेरिंदुभेदा
द्रहार्थः ॥ विभिन्नो यथा शुक्लवृद्धिस्तथास्या तदा संमुखे तं बुधीतां तु बिंबं ॥ विधोर्गोलकत्वाद्यदर्धाल्पशुक्लं भ
वेत् द्विशृंगद्वयाकारमत्र ॥ इदं ह्यर्कबिंबांतरस्वत्र मुक्तं यद्वाधिकारे त्र तदेव योग्यं ॥ सुसूक्ष्मशुक्लानयनप्रसिद्ध्यै तथें
दुभान्वोः स्फुटमंतरं च ॥ गर्भकेंद्रस्थितयोर्हि कर्णांतरं तु बिंबांतरसूत्रमूर्ध्वं ॥ पड्क्तांतरं तु श्रवणैक्यमेव तत् कर्णवर्गै
क्यपदं त्रिभे स्यात् ॥ तिर्यक्स्थितोर्कादिविधुस्तदा तत् कर्णयोर्वर्गवियोगमूलं ॥ इत्थं तदेकानयनेन चोक्तं मिथश्शृंगोदोः
खलु भाधिकारे ॥ विसंमुखे वा तरुस्थितदृष्टिभाग्यया बिंबगोलस्य च खंडकं तत् ॥ बिंबं भवेद्द्रौ निरामकाले तन्नेव शुक्लं च य
थायथाकात् ॥ विधुर्विनिनोऽस्ति न यातथा तद्बिंबमेव शुक्लमिदं हि पूर्णं ॥ स्यात्साम्यमीतं त्वथ तत्र योक्ता चिरंतनाया:

न॰वि॰ कथयंति वार्धे॥ नैवानवीनास्तु यतोर्ककक्षानुर्येविवं दृक्श्रवणांतरे हि॥ देशोभवेन्नियंगिनो यतो ऽत्रासादोनषट्काष्टलवांत्
९१ रेतः॥ दलं नदृश्यस्य दलं स्यमुक्तं मनागपि स्वदृग्भवदत्ता मुतेतु॥ अर्धाधिकत्वात्तु मितस्य सम्यग्दलेन शृंगं नरदृग्ज बि
बो॥ त्रिज्यैदृक्कर्णाहृतिरर्ककर्णा धृत्वास्वपर्याशविहीनकौ कोः॥ ज्ञेयास्तदल्पा विधुशृंगयाप्यप्रवंद्रार्कजस्पष्टक्रियोगभा
गाः॥ सितो रव्यद्गतंतु विहायपूर्वैः पादोनषट्काष्टलवाल्पभागाः॥ भदृत्तचंद्रार्कवशात्सुखार्थं सदाद्यतामध्यमकर्णतु
रते॥ रवेर्मंडलं चंद्रगोले प्रकल्प्य कुगर्भापि दृक्सूत्रमध्यास्थितांद्रा॥ तुलम्ब्यंद्रबिंबेन सार्कंचतस्य स्रुतिग्रासमुर्वं कृतं
तंतु विद्धि॥ ययोः स्पर्शनाद्येकालोप्यत्र हानिर्न दृग्जैक सूत्रस्थतद्धोस्तवस्या॥ सदाग्रास्तत्रांतरे बिंबलिप्ताः समाएवच
द्रार्ककक्षावशात्ताः॥ न दृक्सूत्रमध्येतु तद्वारयोरतुल्याः कलाः स्वस्वगोलस्थितास्ताः॥ तथाप्यत्र दृक्सूत्रबाधतोपिभव
गस्थितास्ताः समानास्तयोः स्युः॥ इदंवासनापूर्वकं बिंबमानुर्यक्यं यताधिकारे पिउक्तं मुक्तं॥ प संस्थितिविंदुगो राम
लस्थितार्कबिंबोर्ध्वंस्तत्रार्कनेवतचंद्रभान्वोः॥ स्फुटस्वस्वकक्षास्थयोरंतरेण तेन कृतं जिष्णुजाद्यैस्तु मनेव सम्यक्॥ ९७
विधोः कक्षिकामानमल्पं रवेस्तन्महद्योजनैस्तत्रतात्रा योजनस्य॥ तदेकं नमानं हि संख्याविभेदः कलामानमेदास्तुसंख्या
समास्यात्॥ अथस्वस्वगोलप्रमाणात्स्वबाहुः स्वरं कुश्चलिप्तामयोनान्यमानात्॥ भुजैक्यांतरात्स्पष्टबाहुः कृतोयः

कथंचिन्नुसस्वस्वगोलस्थशंकोः॥ भवेदंतरं दक्षिणोदक्तथोर्ध्वाधरं शंकुयोगांतरालो ऽतिमानं॥ कथंचिन्न तत्त्वक्कर्णप्र
माणं कथं वास्तवं दृक्कयोर्मध्यसूत्रं॥ विजातीयभागांतरा टत्वमासिद्धियैहिस्यात्तादृक्स्य तत्संघटणुत्वं॥ यदा सूतंत समम
तुलाभं रवेर्मध्यतश्चंद्रसमेनंतारो॥ प्राक्पश्चिमस्थो भवेतौ रवी दृक्पादोनषट्काष्टलवाल्पभागोः॥ शिरोमणौ तत्र न तद्ग
बीहुर्दृष्टांतरं तच्छ्रवणाभिमतं हि॥ दोःकोटिघातमिति नदीयकर्णाभावाद्यथान्यतः तथैकनूनं॥ पादोनषट्काष्टलवाल्पकेय
श्शुगोनतिस्तत्कृत्कानंत्र॥ कर्णस्यतद्वास्तवचंद्रभान्वोः केंद्रांतरेनेवभवेदतो ऽस्मात्॥ विजात्य संक्रांतिभवाविह
फलाद्बाहुस्तथेंदुमानस्तुति खंडवादस्यदोषः॥ इत्थंनदंतित दृसाहियतोर्कबिंबयत्कालितं बुधवरैः रात्रिगोलगं
तत्॥ तद्गोलजातपरिधेः कलिकाप्रमाणात्साजात्यमेवतुलमोस्तनुसंप्रसिद्धं॥ यदृक्षिप्तस्तभ्रंशातः कलिकार्कबिंबवे
यतद्वहि बुधैर्हिमराशिगोले॥ अर्वेदुगोलस्थितकंभान्वोर्मध्ये च सूत्रं जिष्णुसुतोक्तमत्र॥ तेनापि तुल्यं न हि भास्करो
कार्किनान्वितकृतदहनबाणि॥ भुजैर्वैः स्थूलमुक्तं सुखार्थं पारंपर्येण प्रदेशादथात्र॥ बाणाग्रस्थेंदोः सूक्ष्मभय
यात् स्तुष्टपश्यपंडितानांसुखार्थं॥ प्रमाधिकारोदितवद्विधार्कान्तरात्विहद्य्यर्कविधुं प्रकल्प्य॥ कार्यं तु बिंबांतरसूत्र
मार्थेश्चंद्रार्कयोरंतरकं स्फुटं तत्॥ तदंतरज्याखिकर्णनिघ्नी चंद्रार्कबिंबांतरसूत्रभक्ता॥ लब्धस्य चापं विधुदृग्नसंस्थ

त·वि·
९८

तद्भागतिथ्यंशगमितं सितं स्यात्॥ आद्ये तथांत्ये च पदे स्फुटारवेश्चंद्रार्कजाले विवरेण देव॥ अर्काद्विधुत्वं यथागतं स्यात् सितं
द्वितीयेच पदे तृतीये॥ पदान्यथ त्रिज्यकयोक्तपद्याद्येशोपभागास्त्रिमितो विधुत्वाः॥ आद्यं चतुर्थं त्रिभयुक्तभागाद्वितीय
कं चाथ तृतीयकं च॥ यतः सितादप्यसकृद्विधानाद्यर्केंदुबिंबांतरसूत्रयोश्च॥ ज्ञानं यथास्थादवलनं तथा नत्वकुत्राप्य थी
भिर्गणितेन साध्यं॥ सदा त्रिभज्याभ्यधिका त्वकास्यात्तदा त्रिभज्योनितयानयात्रा॥ चापांशकाः स्वांकयुताः प्रकल्प्याश्च
पांशकाः सद्गणितप्रसिध्यै॥ इत्थं रराशास्थितचंद्रबिंबे कृतासितं गोलविदां सुखार्थं॥ अर्केंदुयाम्योत्तरभेदजातसंस्कार
आर्येन कृतः सितार्थे॥ सितास्य यत्नो विधुबिंबगोले चंद्रार्कबिंबांतरसूत्रमास्ति॥ चंद्रोर्ध्वसूत्रोच्च यदंतरेण सितार्थमर्काभि
मतालवास्ते॥ यदेंदुबिंबांतरसूत्रनिघ्नौ ज्यकेषु तद्रश्मितोशकानां॥ अर्काकंकर्णेन फलस्य चापांशकैरिनात्प्रोक्तपरतो
यदेंदु ॥ तत्तिर्यगूर्ध्वाधरमध्यगेंदुलग्न स्वदृत्तो नियतं रवेः स्यात्॥ तदा निशांबिंबदलार्धशुक्लं तद्भास्करोन्नयोनभवे
त्कथंचित्॥ इनात्कल्पितदृढतरांशानुमाना सितेन वक्राशानुपातोपि तेन॥ यथार्थार्धशुक्लप्रदेशानुरोधात् सितं कल्पि
तं यैः कृतं तन्नयुक्तं॥ ॥अथोपपत्तिः॥ ॥कुगर्भाद्रविकक्षास्थरविबिंबगोलकेंद्रं यावत्सूत्रं रविसूत्रसंज्ञं स्यात्॥ तथा
कुगर्भाच्चंद्रकक्षास्थगणितागतचंद्रस्पष्टारविगोलं यावत्सूत्रं तच्चंद्रभोगजसूत्रं॥ तयोः कुगायमंतरं चंद्रार्ककक्षयो

९८

स्तुल्यांशमितागतयर्केंदुसमंरांक्षित्रंपत्रेंदुकक्षायां लग्नं तन्नतकक्षागतं रविचिन्हं स्यात्॥ तत्र चंद्रबिंबगोलकेंद्रं तत
त्कक्षास्थचंद्रभोगाच्छरांतरेस्ति॥ अतश्चंद्रगोले रविचिन्हचंद्रबिंबगोलकेंद्रयोः स्पष्टं वृत्तमेकं चंद्रगोलपरिधिमितं सि
तसिध्यै कल्प्यं॥ एवं कुगर्भाच्चंद्रबिंबगोलकेंद्रस्पष्टासूत्रं रविगोलेनेयं तच्चंद्रसूत्रं॥ अथ तत्सितनवृत्ते चंद्रार्कसूत्रयोरंत
रं स्फुटार्कमध्यमकेंद्वंतरं स्यात्॥ तद्बिंबांतरं रविगोलेतु सूत्रयोश्च स्यात्॥ तज्ज्यायोजनरूपभुजः चंद्रार्कबिंबांतरसूत्रंकु
र्णस्तत्कोटिश्चंद्रसूत्रे कोटिकर्णयोगेतु चंद्रबिंबगोलकेंद्रं॥ ततस्तद्योजनमंडलार्धांतरेण तत्कोलिष्टपरिधिः तत्परिधौ
चक्रांशाश्चतुर्विंशतिमितान्यंगुलानि वा सितज्ञाय कल्पितानि तच्चंद्रवृत्ते चंद्रसूत्रबिंबांतरसूत्रसक्तं चंद्रबिंबगोले सि
तारव्यं स्यात्॥ पद्यस्मिन्कर्णाद्भुजोयं तदा चंद्रमंडलार्धेन कइति॥ पुनर्यद्यस्मिन्व्यासार्धे चापं तदा त्रिज्याव्यासार्धे क
इति॥ अत्र स्फुटाख्य यर्केंदुज्यारविकर्णः योजना गुणा त्रिज्याभक्ताभुजोस्ति तेन समगुणहरनाशेन तच्चापं यथोक्त
मेवोपपन्नं॥ तत्कर्णसूत्रे च चंद्रबिंबकेंद्रोर्ध्वगचंद्रसूत्रयोरंतरं चंद्रबिंबगोलपरिधौ इदमुक्तं चंद्रार्कयोस्तिर्यक्त्वं याव
दनंतरं तु चंद्रबिंबकेंद्रस्थितचंद्रसूत्रगतकर्णसूत्रयोरंतरं स्यात्॥ अत्र शरासावक्रमाद्मानमर्णीतकालयो
तत्सूत्रकर्णसूत्रयोरंतरं तदन्यत्रतु नतस्यात्॥ कर्णसूत्रस्थमुदकमध्यात्सिप्रायेण च यत्रकुत्रास्थितचंद्रबिंबगोलस्य

५

ग्र·वि· घ्नस्य खंडं भूर्ध्वाधिकं भिनाप्तिमुखं विनायहं सदोज्ज्वलं भाति दृश्यतेति चंद्रसूर्यकर्णसूत्रयोरंतरं भाग ... बुगोलस्यार्धाल्प
न्दृश्यखंडं भूसमुखं नासितं तदूर्ध्वं तु सितं स्यात् कर्णसूत्रं चंद्रसूत्राद्यथा यथांतरितं तथा तथा नदृश्याबुगोलखंड सितं स्या
९९ त्॥ चंद्रबुगोले कर्णसूत्रं शुक्लमध्यादुन्नतं सर्वत्र शुक्लानियमात्॥ अर्कस्येंदोस्तिर्यक्स्थितत्वेपि यदूर्ध्वं चंद्रसूत्रं तत्क
र्णसूत्रांतरे शुक्लमुक्तं॥ अनंतरं त्वेंदावस्थितचंद्रसूर्यस्य कर्णसूत्रस्यांतरासिध्याततिलविहनेवकुर्तृ॥ चंद्रबिंबके
न्द्रोर्ध्वे चंद्रसूत्रात् कर्णसूत्रांतरेण तत्र शुक्लस्यापचयदर्शनात्॥ अतस्तदंतरं द्वादशभुक्तं सितं तत्र स्यादित्यादि स्पष्टं॥ ॥
यत्सिद्धांतसि[illegible]रोमणौ सम्पादितं न्यूनाधिकत्वविधौ सच्छृंगोन्नमनेस्वास्तवासितार्थे सार्वभौमोपि तत्तेत्तुच्छं स्वार्थसि
न स्वल्पेनाहि न चेत्तद्वीतितलस्तेयत शृंगोन्नतिरपीह तत्कपि ततः स्यात्संनिकृष्यते॥ ॥ अथानयस्वृत्तगयोरिन्दोःपादो
नषद्भ्यां च्छल्वल्पभागाः॥ बिंबांतरं तत्परस्परं वृत्तात् तिर्यक्स्थिते चोत्तरयाम्यवृत्ते॥ लग्ने सदेन्दोः सितशृंगका चेतदानर द
क्षिणसौम्यमस्मात्॥ सितं तु तत् दिक्कृथयंति चेंदोर्यादृग्रविः स्यान्नतदन्यदिक्स्थं॥ यस्यार्धनेमिः शशिबिंबनेम्या राम
स्वभावतो स्यान्नदधस्तनेमिः॥ सितं परस्यद्भुतपोश्च मध्ये शृंगाग्रगं वापचयस्ततः स्यात्॥ नेवेंदुबाणोथ तदा[illegible]स ९९
त्वेतु तत्स्यात्सितसंज्ञवृत्तं॥ अर्केंदुबिंबद्वयसक्तमस्मात्तिर्यक्स्थवृत्ते सितशृंगकाग्रे॥ इंदुबाणस्य सत्वेतु यत्रोर्ध्वकेंद्र

केंद्रयोः॥ स्पष्टं तद्बलयं ज्ञेयं चंद्रगोले सिताभिधं॥ तुल्यान्यदिक्स्वापमकाक्षदेशे राशिः खमध्येस्ति यदा तदा स्यात्॥ भच
न्द्रमंडल्योरपि दत्तत्राखिलमंत्रिभमुक्तराशिः॥ खतुलामेषमुखो दृश्येत्र तत्कल्पसममंडलं स्यात्॥ तत्रास्ति न
त्रिभहीनलग्नं खमध्यगं भिन्नमिदं परत्र॥ भत्तनदृग्मंडलयोरपि दृश्शृंगे समेतेन रदृग्विनिर्गे॥ शृंगाग्रयन्मेत्राशकयोः सम
त्वादेवं भवत्तेसममंडलेपि ध्रुतिर्यक्स्थमास्यद्वयसक्तवृत्ते तु कुसमुखं शृंगयुगं समं स्यात्॥ तिर्यग्गतं शृंगयुगं च
तत्र दृग्वृत्तनतोथ त्रिभहीनलग्ने॥ चेदिंदुस्वापमं मंडले हि तिर्यक्स्थिते दृश्यिगुच्चतनः स्यात्॥ दृग्वृत्तगं शृंगयुगं समं न
शृंगाग्रमन्मत्राशकयोः स्वासाम्यात्॥ ऊर्ध्वाधरत्वात्तिशृंगभोर्यत्खमध्यगे दोर्वित्तान दृष्टं॥ यथानन्तः सोत्रतयातु दृश्य शृं
गद्वयोर्ध्वाधरताथतेन॥ नरैः कुब्जासिन्नतयात्र दृश्य शृंगद्वयोर्ध्वाधरताविशेषात्॥ नतिर्यग्[illegible]यस्मिन्नदेशे भव
नदृग्मंडलभेदजाता॥ स्यादेकशृंगोन्नतिरन्यशृंगनतत्वभावे नत्रवरभ्युक्तं॥ स्वस्यायस्थनताशकास्तद्वस्व
मूर्ध्वं त्वधिकाभ्यस्य॥ तद्धि स्वतंतदधस्तातेन दृष्टोन्नतिःपश्यति तत्त्वतोत्र॥ नेकथ दूरस्थितिनस्वादृश्थं क्रमेण विंबं
सुधियाखसंस्थं॥ इत्युक्तं शराभिभिभद्वाद्यत्तदेवा हि॥ यारस्तले सितास्यादबं स्फुटं ज्ञेयं विजानता॥ भिन्नेनतेशृंगे
युगं भवेत दृग्वृत्तगतत्वधरोर्ध्वगं स्यात्॥ विप्तिज्ञदृग्वृत्तगतं तु कर्चिनतान्नतं तुल्यनतेसमं स्यात्॥ शृंगे समेस्त्रीय

त॰वि॰ द्विवान्नभावानूर्ध्वाधरत्वे तयद्दिक्कोऽभावः॥ इतीरितं तत्र खगोलजातस्य युक्त्याभावाद्व्यभिचार एव॥ भवत्वहं सूक्ष्मफलयोर
१०० न्दे शृंगे समं दृष्टिवशात्सदा नौ॥ लग्नैकदंवद्वयसक्तवृत्ते गुरुस्थ्य रात्रे कथं तदुक्त्या॥ स्फुटवत्रयो का समता कथं चि
न्नतन्नते किंतु समाख्यसक्ते॥ याम्योत्तराख्ये वलये तु योग्या सायामवृत्ते सममंडले स्यात्॥ यावान्न्यथावा समता त्रिशृं
गे सा स्यात्तु समाख्य द्वयसक्तसूत्रे॥ यस्यान्न दूर्ध्वाधरताथ कोटेः स्याक्तुतः सापरपूर्वसूत्रे॥ इत्थं तदेतीति रसं सिद्धात्परि
लेखाद्विनिर्णयः॥ क्वत्सदनुगेरत्रबकुधाः स्वेहती किल॥ अत्रोच्यते चेत्सकलेत्रखमध्या द्दिसिन्नाद्दिवृत्ते श्वस मेनैतं
त्रैः॥ द्दग्वृत्ततुल्यापममंडलस्थः पादोनबद्धाष्टदलाल्पकेऽर्थी॥ रात्राकरस्त्वयोर्भवतस्तु तत्र शीतांशुशृंगोन्नमनस्य क
ल्ये॥ शृंगे विधीतत्परिलेखरीत्या तत्कोऽथभावात्परपूर्वसूत्रे॥ तिर्यक्कदंबद्वयसूत्रसक्ते प्रसूतेभवतोथ चैवं॥ निर त्र॰५
क्षदेशे लगतोमृगादिस्तलतः क्रमात्याकपरगौ राशीनौ॥ तुल्ये लवैश्चात्रहिमांशुशृंगसमुन्नमं तत्स्फुटबाहुभावात्॥ राम
शृंगेनतेत्परिलेखरीत्या सममाख्यवृत्ते न भवतोथ तेन तु॥ प्रत्यक्षदृष्ट्यागगने कदंबद्वयोर्थ सूत्रे भवतो हिमांशोः॥ एवं भ १००
वृत्ते सममंडलेऽपि खमध्यतस्तुल्यनतांशकेऽस्तौ॥ रवीपरस्थो भवतो रवीन्दू पादोनपंक्त्याष्टदलाल्पभागैः॥ बाह्वोरभा
वात्स्फुटबाहुभावः शंकोश्च साम्यादिह कोद्यभावः॥ शृंगोन्नतत्वात्त्यत्रविधौ तु तद्वच्छृंगेन तदुक्त्या न समाख्यसूत्रे॥ किं

ता॰५

त्वत्र पूर्वापरसूत्रके तद्दृष्टांतगोले विपरीतमस्मात्॥ एवं कुजादूर्ध्वममंडलार्धगते स्यात्र खे च त्रिभहीनलग्नं॥ सदा नतः
प्रागपरौ राशिनौ पादोनपंक्त्याष्टदलाल्पकेऽस्तौ॥ यदा समांशैर्भवतश्च तत्र शृंगोन्नतत्वं न तयोः समत्वात्॥ तत्कोद्यभा
वः स्फुटसंज्ञबाहोर्भावेप्यभावेपि भवेत्सतत्त्व॥ शृंगाग्रयोस्तत्र यमेन तस्या दूर्ध्वाधरत्वं किल कोद्यभावात्॥ तद्बाहु
भावात्किल शृंगयोश्च समत्वमेकतरविरुद्धमिथ्या॥ समाख्ययाम्योत्तरयोश्च सक्तोश्च शृंगे न तस्यात्तद्द्वयमप्यथात्र॥ सि
द्धं भवेत्तत्परिलेखरीत्यात्त्वधाधरत्वं परपूर्वसूत्रे॥ प्रत्यक्षतस्ते किल शृंगकाग्रे कदंबयाम्योत्तरवृत्तगेस्तः॥ अन्ये भुजे
शृंगसमत्वमुक्तमपीह तत्ते परिलेखतो न॥ स्यात्केवलं प्रस्फुटयाक्षरावत्संगसाम्यनियतात्विदं तु॥ तत्परिलेख्या
समाख्यवृत्ते तनजोविरोधं किंतु द्दवगं तत॥ एवं यदा वित्रिभलग्नमिंदोः केंद्रं तदा दृग्भिजमंडलात्तु॥ तिर्यग्गतं चापममंडलं
स्यात्सुधाकरात्तिग्मकरोपि तिर्यक्॥ पादोनपंक्त्याल्पलवांतरेण तत्राधोमेऽपि तु सितं हितं च॥ यथास्वद्दग्मंडलसंस्थितं तुल्यं
तद्दृश्यते तद्विदिहावनिस्थैः॥ अथैव तद्धोल्पगोलकाकृपिशृंगेन दृग्वृत्तसक्ते सदैदोऽस्ति तत्र॥ कुजासन्नभावात्कुजोर्ध्व
स्थितं यत्तद्दूर्ध्वाधरं दृश्यते शृंगमिंदोः॥ कुजोर्ध्वगस्यात्रिसहीनलग्नं चाद्धिव गोलस्य च केंद्रमिंदोः॥ तदा तदूर्ध्वाधर
ताधःशोकुः पावद्दृक्सा न हि कोद्यभावात्॥ त्रिकं कनरौ समौ न हि तयोर्लवांतरस्यादतः शृंगोर्ध्वाधरता कुजोपरि

तं॰वि॰ सदाकोटेरभावः कुतः ॥ एवं स्वाक्षितिजापमाख्यवृत्तितोन्यत्र स्वदेशीयदृक्केंद्रो बिंबजकेंद्रयोर्भवृत्तयेमध्येत्रिभोनांगकः ॥ स
१७ स्यात्तत्र नरद्वयस्य समतं कोटेरभावस्तदा शृंगोर्ध्वाधरता विधोर्नहि सर्वदृष्टांतगोलेकचित् ॥ तेनैव किल यत्र यत्र वा भवेत्को
टेरभावो विधोः शृंगोर्ध्वाधरता तु तत्र वस्तुतो यादृक्करेनोदिता ॥ अथात्र षट्षष्टिपलांशादेशे भचक्ररूपक्षितिजवन्निर्य
क् ॥ सर्वक्रांतिमंडलस्य तत्र शृंगोद्भवः शीतरुचेर्यदा स्यात् ॥ अदृश्यशृंगा क्षितिजादधस्थं दृश्यं च शृंगं क्षितिजोर्ध्वसंस्थं
॥ एवं तदूर्ध्वाधरता भवेद्या सा कोट्यभावादिति गर्वितत्वः ॥ सर्वत्र तद्द्रा वशात्स्वकीयं गुणं तथा जिष्णुसुतार्यदोषं ॥ स्यात्रा
नतो वर्णयतीह मत्वा बाल्मीनमत्यंतहकलार्थकृत्यं ॥ दृग्वृत्ततिर्यग्गत वृत्तलग्नं शृंगाग्रयुग्मं तु सदा न दृश्यं ॥ दृग्वृत्तगं नत
धरोर्ध्वगं स्यान्नान्यत्र यास्थित चंद्रबिंबे ॥ दृग्तेलुते वात्रासितारव्यवृत्ते भमंडले चेत्तु रथाप्रकल्प्ये ॥ अतोन्यथा तद्धितयं तु
यथावदंते सौल्पं तु सितोन्नतिर्मा ॥ यत्केवलो पिस्फुटबाहुभावे स्याच्छृंगसाम्यं किल भास्करोक्तं ॥ सितारव्यदृङ्मंडल
योर्विभेदे तन्नैव सद्धक्समताविरोधात् ॥ एवं हि यत्र स्फुटबाहुभावो न तत्र साम्यं नियमेन दृग्जं ॥ दृग्ज्ये तु साम्यं नियमा राम
स्फुटारव्यबाहोरभावो नहि बाधकोटेः ॥ अभावतः स्यान्नियमेन दृग्जं चोर्ध्वाधरत्वं न तथाधरोर्ध्वात् ॥ दृक्कोणकाय १७
न्नियमेन नैव तत्कोट्यभावो नुपपत्तिरित्थं ॥ प्रसिद्धसिद्धांतशिरोमणिस्थसमाधरोर्ध्वेंदुसितप्रजाता ॥ समर्थनं तत्र तु सा

वेभिः श्रीविश्वरूपेण कृतं तदेव ॥ स्वतत्कोट्यभावोस्ति यत्राप्यतान्नैव हि प्राक्परं स्वत्रकं शृंगसक्तं ॥ यतो भास्करोक्तप्रकारात्सदे
वभवेत्तेन तत्कोट्यभावं विनापि ॥ यदुक्तं च पूर्वापरं शृंगयुग्मं स्वतेयदूर्ध्वाधरत्वेन नार्कौ ॥ परं त्वत्र रेखीय दृष्टांतगोले विधोः
शृंगयोरंतरे तन्न सूत्रं ॥ तथैवात्र कोटेरभावे न चोर्ध्वाधरं चापि दृग्वृत्तलग्नं शृंगयुग्मं ॥ … केचलत्वात्कपरंतात्किमर्थं निरू
तं बुधैस्तद्धि भाव्यं स्वबुध्या ॥ अबाध्यासितकर्णोर्थगादित्यथ शिरोमणौ ॥ अन्यजातिभवजात्यं चंद्रार्कांतस्ततत्र सत् ॥ एवं
हि षट्षष्टिपलांशदेशे भचक्ररूपक्षितिजे मृगादौ ॥ चंद्रार्कविंबे मिथुनेथ तत्र विधोः सितं स्यादधिकं सदा धनुः ॥ शृंगोद्भवो
नैवातस्तत्र भकोटिपक्षे पिसितं विधोः प्राक् ॥ यद्याम्यसौम्यौ मिथमंडलेन प्रखंडलं शुक्लमिवास्ति पूर्णं ॥ तत्रापि प
क्षे परबाहुकोट्योः साम्यान्न हि स्यादिति भास्करोक्तिः ॥ भकोट्यभावे राशिः शृंगजेय वाप्यूर्ध्वाधरत्वं परमर्कत्वे ॥ तु को
ट्यभावान्न भवेदिती थं श्रीविष्णुजार्यप्रतिभास्करोक्तिः ॥ स्वदूषणं हि स्वमुखात्कृतं तैः सिद्धांतविद्भिर्यसमाप्रविष्टः ॥ विं
बे विधोस्तत्परिलेखतो या पूर्वापरा सा सममंडलस्था ॥ समांतरस्था यदि वा लता स्याद्याम्यसौम्येव समारव्यसक्ता ॥
एवं हि या स्यात्प्रकृतस्थचंद्रे पूर्वापरा सा सममंडली यात् ॥ पूर्वापरारव्या च समांतरेण स्थिताथ तत्राभव सूत्रमेव ॥ ति
र्यग्गतं यत्र शशीनयोः स्यात्तत्रार्धशुक्लो विधुमर्कभागे ॥ पादोनषद्घाष्टलवांतरेण निर्णीतिमार्यैः सितस्वक्षभेदैः ॥ तत्र

ग.वि.
१०२

याम्योत्तरमंडलेन प्रखंडितं शुक्लमिवास्ति पूर्णं ॥ नान्यत्र तेन प्रकृतेन तस्मात्प्रकाशितं न याम्योत्तरखंडितं तत् ॥ अर्धेन शृंगोन्न
तदन्तरं तत्पूर्वापरं याम्यशृंगस्थितश्च चंद्रे ॥ अतस्तदोत्कारलयोर्दलयत्वोर्ध्वाधरत्वं नियमान्न तत्स्यात् ॥ यत्संभवोऽसंभवलक्षणं
स्थितस्यात्र दोषो न हिताहितमरस्य ॥ आनंतिनो यगणितं सगोलं तेषां हितं त्र्यसनं बुधेव ॥ दृग्गोलकुंडस्थितविचारदक्षै
र्यद्बरेखा न दृशा न दृष्टं ॥ प्रकल्प्यतत्स्वात्परिलेखतस्तैः प्रतारिता मंदधियो त्रसर्वे ॥ अथान्यथा गोलविदां सुखार्थमप्
वेचंद्रोदय दृश्यकाले ॥ शुभाशुभज्ञानविधौ हिमांशोः शृंगोन्नतिं स्वधिया तं स्वधिया ॥ अर्केंदुपाताद्विभहीनलग्नं दृक्कर्म
पश्चापमधः शशांकबाणः ॥ बिंबीद्वृत्तगतानतांशगाविधौ स्फुटं चांतरमिंदुभान्वोः ॥ इत्थं विदित्वा प्रथमं परिद्यैः शृंगोन्न
तेः सफलितं विधेयं ॥ बुद्धेनय जिष्णुसुतार्यलल्लपृथूदकश्रीपतिभास्करायैः ॥ विक्षेपकाबाणलवैर्विना द्रीन्द्वार्क
जस्पष्टवियोगभक्ता ॥ लब्धस्य चापं प्रथमः शरान्याद्विक्संस्थितोन्यः शरसंस्कृतस्य ॥ दृक्क्षेपचापस्य लवैस्त्रिभज्याग्
णानतांशैर्विहृतात्तु चापं ॥ स्फुटाख्यदृक्क्षेपकचापदिक्स्याद्दिकान्यादित्वेतु वियोगयोगात् ॥ जया यदा तं गगनेंदुमित्त
भज्जायते दृग्वलनं हिमांशोः ॥ अपूर्वशुक्लादिगतस्य चंद्रः सुसूक्ष्मशृंगस्तु कुजोर्ध्वसंस्थे ॥ अत्रैकदिक्कलेप्रथमान्य
योर्हि यदाधिकोन्यः प्रथमात्तदा स्यात् ॥ तदायदिक्कस्तं च लदन्यथा तेसर्वतस्यात्प्रथमान्यदिक्स्थ ॥ अथोक्तशुक्लेनावि

हीनितान्यत्र रोमुनापृच्छकालिलोयदाप्तं ॥ छिन्नं चत्वरोनुसुलंतदर्धे स्यात्तांकभाद्दृश्यभास्वभास्ये ॥ षडंगुलव्याससदलेन
दृत्तं कार्यं च षोडशामलवाके तत्र मध्ये स्य दृक्मंडलरूपरेखाम् ऊर्ध्वाधरा चाथ तथा द्वितीया ॥ तिर्यक्स्थितां मध्यगतां च कु
र्यात् प्रक्प्रभत्वयोन्यधियापरं सुधी ॥ स्वैतत्वृत्तमंडलस्वत्रमूर्ध्वं यत्र ॥ स्थितत्प्राकृतस्थितदृष्टिचिन्हं ॥ अधः स्थितं चैव मितास्तिय
त्तत्पश्चिमस्थं किल दृष्टिचिन्हं ॥ प्राग्दृष्टिचिन्हाद्वलनं यथाशं दृग्जं विधेयं सुधिया तथात्र ॥ केंद्राद्विभा तद्वलनाग्रसूत्रे
कृत्वा विभाज्य स्वभया च वृत्तं ॥ दिग्घ्नेंदुखंडा कातरखमत्रस्यात्तु गमांगवलनान्यदिक्स्थ ॥ हिमांशुबिंबीय दृक्सुत्रतत्र तत्
सितहृतिर्यग्गतसूत्रनतस्तत् ॥ शृंगप्रमाणं वलनांगुलैस्तत्स्त्रोयस्तातत्परिलेखतः किं ॥ ॥ अत्रोपपात्तिं शृणुभद्र मेगाभा द्वि
स्तत्र नयेत्सूर्य गतं तदत्र ॥ शशांकगोले किल पत्रकल्यं तदर्कचिन्हं हिमरश्मिगोले ॥ तद्विंदुबिंबकेंद्रयोर्यदंतरं स्थिताभिधे
॥ तेदर्कचंद्रयोस्तिवे स्फुटांतरं पुरोदितं ॥ इहेंदुकक्षिका समंतदिंदुबिंबकेंद्रयोः ॥ गतं किल स्फुटं स्वयं सितासितं च मंड
लं ॥ अपोन्वाद्विधोस्तदाभमंडलं सिताभिधं ॥ सिताभिधं च मंडलं यदान्तरं त्वयोर्न हि ॥ तदान्तदृश्यमंडलं हिमद्युतेन न
चोज्वलं ॥ यथेंदुबिंबकेंद्रतोंतरेण चिन्हमर्कजं ॥ भवेत्तथा हि बिंबभुवं सिताभिधं च मंडलं ॥ तदुज्वलं तथा भवेद्यथोक्तशु
क्लमानतः ॥ सितारव्यमंडलं यदा भवेच्च दृष्टिमंडलं ॥ तदेंदु याम्यसौम्यके समं च शृंगकद्वयं ॥ नदृष्टिसंमुखं स्तवोदितं सम

राम
१०२

२ तथासितं तदूर्ध्वगं तथैव श्रृंगमूर्ध्वगं २

स्तसंमतं॥कुजोर्ध्वगेंदुमंडले त्वधस्थदृष्टिचिन्हतः॥सितं भवेदिहध्रुवं विलग्नदृष्टिमंडले॥यदा तु दृक् सिताख्ययो र्वि
न वि० भेदएव तत्रवै॥अधस्थदृष्टिचिन्हतः सितामिधं यथोर्ध्वगं॥तिर्यग्गतैस्तद्वृतितः सिताख्यमत्र नेंदुकेंद्रवशाद्य दस्ति
१०२ तूर्ध्वाधरत्वं खलु श्रृंगयोश्च स्वस्थानतः खलु रूपारिलेख्यात्॥यत्रोर्ध्वश्रृंगाग्रकचंद्रतांशा विंबाधिकाः स्युस्तदधस्थि
तस्य॥श्रृंगाग्रकस्याथ तदेवतत्त्वं दृग्वृत्तगोर्ध्वाधरश्रृंगयुग्मं॥दृग्वृत्तजोर्ध्वाधरता त्रयासा कुजोर्ध्वगेंदुकवशात्स्वस्थ्य
॥कुजादधस्थेतु रवौ कुजोर्ध्वविधौ तु सानैव भवेत्कथं चित्॥चेद्दृश्यश्रृंगोन्नमनं तदिष्टं दृग्वृत्तगोर्ध्वाधरश्रृंगता त्र॥कु
त्रापि नो भास्करकोधभावात्तासिद्धिरुक्तापि तथैव चातः॥यद्दृश्यते स्वल्पदृशा कदाचित्स्वल्पांतरत्वाद्धि गानिहाधरो
र्ध्वौ॥ततः स्थिः कुजोर्ध्वनक्षिवास्तवं तद्दृष्टांतगोलाभिमतं न यस्मात्॥अदृश्यश्रृंगोन्नमनेविनैव तत्कोधभावं किल सि
द्धिरस्याः॥कुकोधभावोत्र मजातदोषात्सार्धविरोधं जनयंति वाज्ञाः॥तदेव चंद्रमंडले भवेत्कुमंडलत्रयं॥सितामिधं व राम
मंडलं तथा दृगुत्थमंडलं॥भमंडलाच्छरांतरे समंतलस्य संमितं॥भवृत्ततुल्यमंडलं हिमांशुकेंद्रगं सदा॥अथास्तादजो १०२
र्ध्वगं चंद्रविंबे तदधस्थनेम्याप्रथमाभिधं स्यात्॥भवृत्ततुल्याख्यसिताख्यमध्ये भवृत्ततुल्याख्यदृगुत्थमध्ये॥अन्या
भिधं स्या॥सितस्यदृष्टिचिन्हांतरं दृग्वलनं स्फुटं स्यात्॥तत्रेंदुगोले रविचिन्हचंद्रकेंद्रांतरं यत्सितसंज्ञवृत्ते॥स्फुटं र

स्ति०

८१

वीद्वोर्विकंस्फुतिः स्यात्तथार्कचिन्हाच्छरिकक्षिकायां॥चंद्रस्य भोगावधिभोस्फुटं तच्चंद्रार्कयोः स्याद्विवरं तु कोटिः॥तदं
तरं स्याच्छरिबाणकर्णो भुजस्तदिस्थकिलचापजात्यं॥एवं रवमध्याच्छविबिंबकेंद्रयावन्न दृगुत्थवलये स्फुटाख्या॥
॥नतीनका स्याद्भुवणे भवृत्ततुल्याख्यवृत्ते कथितान कोटिः॥दृक्क्षेपवृत्ताच्छविबिंबकेंद्रं यावच्च दृक्क्षेपधनुः स्फुटाख्यं
॥भुजस्तदिस्थकिलचापजात्यमंगाधान्ययोरानयनाययोग्यं॥स्वल्पांतरत्वात्कुभुजत्वजात्यमलावधीद्वौ निकटस्थित
त्वात्॥स्वल्पांतरत्वादबहुप्रयोगात्त्रसत्त्वभावाद्बहुप्रयासात्॥ग्रंथस्य तज्ज्ञैर्गुरुताभयेन यस्त्यज्यतेर्थः स
नदूषणाय॥श्रोतंशिरोमणिकृता किलकाद्यभावे श्रृंगस्यदूर्ध्वमिहसरल्पर एवकल्पने॥तस्याधुनाबहुविधानुपपत्तिर
त्र प्रोग्दर्शितास्तिन यमान्त्र यतोतरंलता॥श्रृंगाग्रयोस्त्वपरएवमथाधरोर्ध्वामिथं चतोन तदुदाहृतकोटिबाह्वोः
नास्ति विभाति मम दृग्गणितैक्यमत्र श्रृंगोन्नतौ सुगणकैर्निपुणं विलोक्यं॥कुगर्भदृक्कांचित्त्वथवात्सुरवार्थभुक्तं दृश्यं
गोन्नतिजमयोक्तं॥स्वदृग्वशालंबनतोन्यथात्वे यत्तन्न विस्तारभयाद्विहोक्तं॥सूर्याद्भुजोत्पादकोः स करायिचेद्र
स्फुलानिगताः स्वोध्वमार्गे॥श्रृंगाद्भुजनतं सकाविस्तुके विचित्रगंवाद्विधावु बिंबनं दृश्यं॥अर्कस्यास्तानंतरं दृग्ज तज्ज
दोषाभावादिंदुश्रृंगोन्नमल्पं॥श्रृंगाधिक्यं तज्जदग्दोषतस्तद्दृश्यं ने बाधाधिके तत्कथं चित्॥

ता॰चि॰ अथांबुचंद्रमंडलं रवींदुपर्वणो क्रमात्॥ स्वभाक्रमात्स्थितं यतोत एव दृश्यमन्नवे॥ ॥इति श्रीकमलाकरविरचिते सिद्धांततत्त्व
विवेके शृंगोन्नत्यधिकारः॥ ७॥ ॥विहगानां विधुपूर्वकाणां बिंबात्मकानां गणितप्रसिद्धिः॥ इष्टुं विनानेयमवादनात्यात
१०४ त्साधनं तावदतः प्रवक्ष्ये॥ चंद्रादिघनं रंध्रार्करसाक्षीकादश हृताः॥ चं ७० मं १ बु १२० गु ६ शु १२० श १२० परेषु लिप्तिकाः
सौरैः कृतवास्क्रमात्स्मृताः॥ सपातमंदस्फुटखेटदोज्यापरेषु मौर्व्या गुणिता विभक्ता॥ स्वशीघ्रकर्णेन कुजादिकानां त्रिभ
ज्यया वीतरवेः फलस्य॥ चापं कलाद्यो विविरवः स्फुटः स्यात्सपातमंदस्फुटगोलदिक॥ स्फुटग्रहानेव कथं विदंके
यशारस्यानयनं बुधेद्रैः॥ पातेथवा शीघ्रफलं विलोमं कृत्वा विरतत्स्फुटे तेनो युक्ताछरस्यानयनं विधेयं यथोक्तरीत्या
क्रारेण तुल्यं॥ स्फुटं परेषु परिगृह्य बाणं चलास्यकर्णं निभासिंजिनी वा॥ यथोक्तपाताद्य खगाछरो या विधोरवेर्काः स्फु
टएक भौमात्॥ नाग्र्यस्यलापमस्तिर्यक्कुनथैतेषु विमंडलात्॥ भवतस्ते द्युतो भूदैः ग्गा स्यात्तयेषु कथं कृतः॥ विधुर्यदि वि
ताः स्थः कथं तज्जापमाहिसन्॥ एकरीत्याद्यपां सिद्धिर्नैक्यग्रहवशादिह॥ भेदन खेटभोगाद्यन वत्यं ह्रोस्तुतस्तुजं॥ ८
तत्र ग्रहाकारं बारव्ययुक्तदंतांतरं तथा॥ भदृत्ता ताकादंतांतरं वलनमायनं॥ तज्जीवा वलनज्यास्या दृथतत्साधनं शृणु
॥ चलखेटस्य कोटिज्यापरक्रांतिज्यया गुणा॥ द्युज्याधृता तत्र चापमायनं वलनं भवेत्॥ सत्रिराशिग्रहक्रांतिज्यका सा
रा॰भ॰ १०४

त्रिज्यका गुणा॥ केवलग्रहजद्युज्या भक्ता वायलनज्यका॥ गोलसंधौ तु परमा परक्रांतिज्यका मिता॥ तदभावोयनाद्रौ सा
यनाद्रिक्रायनाभिधा॥ तच्चापं वलनं ज्ञेयमथ बिंबावधीहये॥ पातस्थानाल्लवकोंशा गानाज्यके च ये॥ मिथः कोटि
ज्यका निघ्नौ स्याताहारगुणोयतो॥ त्रिज्या गुणगुणाहरो धृतात्तचापसंमितं॥ वारजं वलनं ज्ञेयं भक्तग्रहतो नतारु॥
यथोक्तपरबाणात्तु कथं निष्ठीतगुक्तिना॥ यावेहायनमत्स्योक्तं सार्वभौमेश शाङ्कवं॥ गोलयुक्ययुतं न तुयछयमार्थं वरे
ध्रुवं॥ आयनानयने यस्मात्तत्क्रतातु भमंडलो॥ स्फुटग्रहो महालालिशरीयानयने फलं॥ विमंडलेग्रहीनानि सएव
स्थेमसंगतं॥ पातस्थानाद्दत्तेयद्भोगोवध्यंतरं तु तद॥ यावद्विवित्तेरयां कर्णकोध्वेरान्स्थये॥ वारीयायनयोरे
कैनैवसिध्यातिलत्वतः॥ सत्रिभग्रहजद्युज्या धृता खेटापमज्यका॥ त्रिज्या गुणा थतचापमन्यक्रांतिः स्याद्विभवेत्॥ व
लयहपरक्रांतिज्ययो राहतिः कृता॥ सत्रिग्रहद्युमौर्व्याप्ता चापमन्यापमस्ततः॥ स्वेषुसंस्कारतः स्पष्टो भवेत्संस्काराद
कृत्वसः॥ ग्रहकोटिर्द्युजीवाघ्नी तज्जीवा त्रिज्यया धृता॥ तच्चापं तु स्फुटाकांति स्पष्टान्यानमादिक स्थिता॥ यद्वाल्पापम
जीवाभासस्फुटान्यापमसिंजिनी॥ खेटापमज्यया निघ्नी चापं विवस्फुटापमः॥ नग्यया स्फुटारव्या ...को निर्ज्ञे
याबुधैरिह॥ जिनज्यका घ्ना त्रिगुणा धृताया श्वलांशमौर्व्याश्च धनुर्लवानां॥ कोटिज्यका द्यो थ चलांश

त॰वि॰ ज्यकाजिनज्यागुणिताद्यभक्ता॥ तच्चापमत्र खलु वेलिव कज्जीवा कृताद्य निघ्नी त्रिगुणोद्धृता स्यात्॥ चापं स्फुटा
१०५ यापमभागका स्युः स्वान्यद्युतेपि ध्रुवपो स्यनुनं॥ क्रमोत्क्रमज्या कृतियोगमूलं चलोन्नतांशद्गुणिता जिनज्या॥ त्रिज्योद्धृ
तातद्धनुश्चापमत्रापि हि चलवाद्यं स्वनैवयुतं च॥ विदंतिये गोलसुसूक्ष्मतत्त्वैरन्यथैवानयनं तु कार्यं॥ बिंबस्फुटक्रांतिभ
वांशकानां चान्यस्फुटक्रांतिभवांशकानां॥ चलाग्रकैः संस्कृतबिंबरस्य कोटिज्यका स्वभुज कोटिमौर्व्यां॥ निघ्नी विभो
र्था विहृता स्वचापं लवानखगेकालवपूर्वकः स्यात्॥ बिंबग्रहस्त्वाद्यपदे चलाख्यग्रहे तथाद्यादि पदक्रमेण॥ भार्धत्रि
भुक्तसाहितोथ भार्धलवैस्तथास्या क्रमणाद्यग्रा युतः॥ खगाः स्वरामैर्विहृता विलब्धग्रहादिको सौ चलवृत्तगः स्यात्
॥ आद्यतथान्त्यपदस्य बिंबचलाख्यखगो सम भागांशसंस्थे॥ त्रिज्याशरज्यानिहतिस्तु बिंबग्रहस्य मौर्व्या विहृता न
चापं॥ स्यात्त्वेष्वादिकः परमः शरोसौ बिंबग्रहस्याथ चलग्रहस्य॥ गोलस्थितेनैव पराप मेन सुसंस्कृतः स्पष्टपरोपमः राम
स्यात्॥ तज्याथ बिंबग्रहजज्यया घ्नी त्रिभज्यया प्राप्तफलं च चापम्॥ क्रांतिः स्फुटा स्यात्परमस्फुटाख्य क्रांत्यंशादिग्बि १०५
बखगस्यादिस्थौ॥ एवंहि बिंबग्रहजज्यकाघ्नी परस्फुटक्रांतिलकज्यकैव॥ स त्रिग्रहस्फुज्ययाहिता स चापं स्फुटान्या
पमकः पुरोक्तः॥ खेटोत्तरी यैव हि बिंबखेटादपीह सर्वं गणितं प्रसाध्यं॥ एवं नाड्या ह्यया द्विधाविधिस्पष्टापमः कृतः ::

२ एवं त्रियुक्तादपि बिंबखेटात्स्फुटापमस्तस्य तु वा युमौर्वी॥ हराप्तवेतन्न हताभ्रमौर्व्या निघ्नस्फुटक्रांतिगुणोस्य चापं॥
अन्यस्फुटक्रांतिरयं च बिंबग्रहस्य केवलं हरेणाप्तं॥ परस्फुटक्रांतिलकज्यया घ्नी चान्यस्फुटक्रांतिरिहस्व बिंबाल-२

७५२

व्यस्तसंस्कारतः खेटापमस्यात्स्फुटः शरः॥ शरोपमेणोप्रकारान्यां साधयित्वा शरं स्फुटं॥ स्फुटापमः कार्यतस्य व्य
भिचारोस्ति हि कश्चित्॥ यत्का गोलायनादि वै सर्वतः खनवशुग॥ कदंबास्फुटक्रांतिज्यात्यल्पकधुकासमा॥ वस्तु
तत्तापितद्वीत्यानायात्येवेस्त्वलांतरे॥ व्यभिचारोपि तेनात्र ततः केतं गणितं कृतं॥ अत्रोपपत्तिः॥ ॥ ध्रुवान्यकदंबान्यो
न्यचलवृत्ते कार्ये। तेक्रांतिवृत्तस्थग्रहभोगा चिन्हात्परिनेये तेचनाडीवृत्ते यत्र स्पृष्टे तत्तत्स्वस्ववृत्ते ग्रहभोगावधिस्वस्व
क्रांत्यंशाः ध्रुववृत्ते आद्यसंज्ञाः कदंबवृत्ते न्यसंज्ञा इति॥ गोलसंधौ नयाः खभावोपनसंधौः तयोः परमलंबिनाशस्तु
ल्यं क्रांतिवृत्ते यत्र ग्रहचिन्हं तस्मात्कदंबवृत्तं नाडीवृत्ते संपाते न्यत्र ग्रहचिन्हं ताभ्यायो क्षितिजे ते पि स्वस्वसंज्ञया प्र
यतः तत्कुजयोः स त्रिभग्रहस्थाने सांकग्रहस्थाने च संपातस्तत्रान्य ग्रहचिन्हं कुजे यथा नाडीवृत्तात्सत्रिभग्रहस्वचिन्ह
स्वक्रांत्यंतरे त्वंतरितं तथा ध्रुवात् ग्रहसंबंधिकदंबवृत्तमप्यंतरितं तत्तुल्यंतरे तत्कदंबवृत्तात् नाडीवृत्तं तु सत्रिभग्रहद्युज्या
चापाग्रांतरितं तत्र तत्कदंबवृत्तं क्रांतिवृत्तं कल्प्यं नाडीवृत्तं नाडीवृत्तमेव॥ सत्रिभग्रहद्युज्या चापांशाः परक्रांत्यंशाः
आद्यक्रांत्यंशाः स्पष्टक्रांत्यंशाः श्च क्रांत्यंशा एवकल्प्याः अन्यक्रांत्यंशाः स्पष्टान्यक्रांत्यंशाश्च तत्क्रमेणाक्षांशाः ध्रु
वो ध्रुवावन्यग्रहचिन्हं गोलसंधिरित्यन्यक्रांतिस्पष्टक्रांत्योरानयनं यथोक्तमुपपन्नमुक्तक्रांतिक्षेत्ररीत्या एवंग्रहसंबं

त॰वि॰ धिकरं वृत्तं नाडीवृत्तं। ग्रहसंबंधि ध्रुववृत्तं क्रांतिवृत्तं आयनवलनं ग्रहचिन्हकुजे परक्रांत्यंशाः अन्यग्रहचिन्हकुजे सवि
१०६ श्री भग्रहक्रांतिः क्रांतिरेव। ग्रहात् ध्रुवावधि ग्रहद्युज्या चापांशाः द्युज्यांशाः ग्रहचिन्हं गोलसंधिः सात्रिभग्रहचिन्हसांक य
हचिन्हे ध्रुवावधि आयनवलनानयनमुपपन्नं ज्ञातेष्टक्रांत्या परक्रांत्यानयनरीत्या खेटकोष्ठपमोवाकुविषमोन्यापमः
समः॥ एकपार्श्वे परक्रांतिश्रुतेरन्यत्र चासमः॥ ॥खेटापमो यनाख्यवलनं हि समास्त्विदं॥ चतुःकोणं ध्रुवश्रुत्यग्रे च
कोणो समोन्यतः॥ ॥अथ स्पष्टक्रांतिवासनान्यप्रकारात्सा यथा गोलसंधिद्वयसक्तं चलवृत्तं यत्र ग्रहबिंबोपरि नेयं॥
अयनमंडले क्रांतिवृत्तं तद्धृतयोरंतरं परमः वारः क्रांतिनाडीवृत्तांतरं परमापमो नाडीवृत्तद्धृतयोरंतरं तु परस्पष्टापम
स्तत्र चलवृत्तं क्रांतिवृत्तं कल्प्यं क्रांतिवृत्तं नाडीवृत्तं रासंबंधिवृत्तं स्पष्टक्रांतिसंबंधिवृत्तं तु नाडीवृत्तं वास्तवमेव॥ चल
वृत्तं क्रांतिवृत्तं तत्र बिंबसंबंधिवृत्ते त्रोशरः बिंबग्रहः स्यात्तथा ध्रुववृत्ते तत्संबंधि क्रांत्यंशाश्च स्पष्टा स्युस्तेन साध्या गोल
क्षेत्रप्रपंचकुशलैः॥ ॥बाणो यदा स्यात्खरस्य तस्य दृग्मंडलेनम्रं नतभागजीवे॥ बिंबोद्भवे तन्नमनं वदेनचेकेंद्रमीसिद्धिं राम
कथयामि लक्ष्मा॥ लग्नोन्नितसकेंद्रत्रिभरवे चेरेइंकेंद्रप्रकल्प्यास्य च वाकुमौर्वी॥ निघ्नीषुकोटिज्यकया त्रिमौर्व्या १०६
धृतात्तचापोनितरवोक्तोज्या॥ हारोगुणः स्यात्त्रिगुणो ग्रहतो धृतागुणघ्नी किषुसिंजिनीया॥ यार्कचलेषुस्त्विषुदि

क्चतेन दृक्क्षेपचापं फलसंस्कृतं स्यात्॥ स्पष्टं कुजोर्ध्वं मकरादिकेंद्रे कर्कादिकेंद्रे थ विभिन्न दिक्स्यात्॥ दृक्क्षेपकौ[illegible] घलि
तत्कुजाधः स्पष्टं हि दृक्क्षेपकचापमूह्यं॥ [illegible] संगुण त्रिज्यकया विभक्ता॥ सा स्पष्टदृक्क्षेपकचाप
कोटिज्यका भुजः स्यादथ कोटिरत्र॥ स्फुटास्य दृक्क्षेपकचापमौर्वी तद्वर्गयोगस्य पदं नतज्या॥ चापं नतांशाश्च तदूनखा
काभिता स्वदृङ्मंडलगोन्नतांशाः॥ बिंबोद्भवाकास्तव रस्य न्यूनं ते वार्ध्व दृक्क्षेपवशात्कुजोर्ध्वं॥ अधःस्थिता लोक्षितिजाद
धःस्था खेटद्युरात्रिप्रगतेष्य जाताः॥ कृत्वान्यथैवानयनं चलेषोस्त[illegible] स्पष्टनरामरीचो॥ प्रोक्ताथ सा गोलजयु
क्तिर्भून्यावेद्यो बुधेश्वापजजात्यविज्ञैः॥ विमंडलस्थग्रहबिंबगोलकेंद्रे द्वयं योजनसूत्रमेवं॥ गोलेद्भवक्षेत्रविचार
दक्षैः साध्यं सुसूक्ष्मं गणितप्रकारैः॥ खेस्वस्वगोलस्थितखेटयोश्चाभीष्टो दिनेशाः खचरस्तदन्यः॥ कल्प्योऽर्खेटां क
तरासिंजिनीया ग्रहेषुकोटिज्यकया विनिघ्नी॥ [illegible] निमौर्व्याफलचापतुल्यं चापे नहेनुपरिकल्प्यतस्मात्॥ प्रकल्पिते
द्भवकोटिमौर्व्या धृताप्रसिद्धेषुगुणेन निघ्नी॥ त्रिभज्यकाल्लब्धमलब्ध चापं तदर्करवेटस्थ शरांतरं वा एकान्यादिवेश
रयोलदक्षरवेटाकयोः कल्पितमंतरं स्यात्॥ प्रभाधिकारानयने नतांशाः साध्यं ग्रहार्कांतरकं स्फुटं खव्यौ॥ अर्काभि
धातखचरतो ग्रहस्याधरोर्ध्वकक्षावरात श्चतस्मात्॥ प्रोक्ताधिकारो निवदन्न कार्यं ततखेटयोर्योजनबिंब सूत्रं य

भुवा५

ता·वि· दारवगोभवाः स्तदैवमतोन्यथा लेगदिलंपुराबत॥ अत्रविस्तरभयान्नमयोक्तावासना मतिमतासकलोह्या॥ गोलचाप
१०७ भवज्यायाविमेदैगोलबोधइदमेवफलंहि॥ भक्तेनगंवकेनरफागचिन्हेगर्भोद्भवस्वक्षितिजेर्थस्यात्॥ तद्देशराग्रस्थितिखे
टबिंबंनीतंत्रलयेनचावज्जस्थं॥ दृक्कर्मकालःखबुधैर्निरुक्तः सचाद्विधायाम्यायनभेदसि दा द्दः॥ निरक्षजंयावदिहाय
नाख्यः स्वीयंकुजंयावदतोक्षसंज्ञः॥ यतःसमाख्यातिमुखाननबाणस्त्वसौकदंबाभिमुखःसदातः॥ उन्नामनंनामन
कंस्वाद्बातात्सौम्ययाम्युक्रांक्रह्रस्य॥ सौम्यायनेवाक्रमिदंविलोमाद्याम्यपतोव्युत्क्रमथात्लभक्षे॥ तन्नाम्नेग्र
खचरोदयः प्राकुचोन्नामनेव्यस्तमतोत्तरखेटे॥ स्पष्टाखेटस्याविंबयथावैस्तत्रंविनिर्गतं॥ भक्तेयत्रलग्नंसज्ञेयःस्वा
यनदृग्ग्रहः॥ निरक्षाक्षितिजेलग्नंसस्याद्विबोदयेध्रुवं॥ आयनेनकिलदृक्कर्मेतद्ग्रहांतरलिप्तिकाः॥ ग्रहायनेषुभिन्नेक
दिक्विसर्वणग्रहेस्मृतं॥ दृग्ग्रहापमतस्पष्टापमयोर्व्यस्तसंस्कृतेः॥ स्फुटश्चारःसदकेरखेटापमसंस्कृतिहितवे॥ अथवादः राम
१०७ क्रान्त्यहादेववलनंकार्यमुक्तवत्॥ तद्धनखांकभागज्यायष्टिःस्यादथयष्टिहत्॥ भस्फुटचुज्यकात्रिज्यानिहतिस्त
हुनुःस्फुटः॥ रारोसौबिंबदृक्करखेटांतरेस्यात्ध्रुवस्तत्रगः॥ दृक्करेखेटापमबिंबोत्थस्फुटसंज्ञापमांतरे॥ क्षेत्रस्थितिगोल
गोतामवुध्वेवोक्ता प्रकारद्वयतःस्फुटम्॥ शिरोमणौताविहनोपयुक्तौ सिद्धंतत्वकंदतानुधानं॥ ॥अथायनाख्य
त

दृक्करखेटं सर्वेद्धादपिसंस्फुटं॥ भूचरीयाप्रवक्ष्यामिगणकानंदहेतवे॥ त्रिज्यागुणः खेटगुणः स्वकोटिध्रुज्योध्रुतश्चाप
मतः सचाद्यः॥ भ्न्यापमज्यात्रिगुणेननिघ्नी जिनांशमौर्व्याविहृताप्तचापं॥ बोध्योभवेदन्यरहस्फुटाख्यःपभस्फुटा
न्यापभजीवयोर्यत्॥ पदं चवर्गांतरतस्त्रिभज्यागुणंस्फुटक्रांतिदिनज्ययाप्तं॥ तच्चापतुल्यास्त्रिभयुक्खेटापभज्यया
गुणिताविभक्ता॥ स्पष्टापमद्युज्यकया स्फुटान्यापमस्यजीवाफलचापमन्यः॥ यद्वास्फुटान्यापमकोटिजीवात्रि
भज्ययासंगुणिताविभक्ता॥ स्पष्टापमद्युज्यकयाप्तचापकोधनुस्संख्याकह्रान्यसंज्ञः॥ मध्यस्फुटान्यापमयोःसमा
न्यदिक्त्वे कृताद्यान्यवियोगयोगः॥ स्फुटश्चखेस्युर्विधुवांशकास्तत्क्षेत्रांशकाश्चापमिहप्रकल्प्य॥ पादोभवेद्ये... य
नस्वेचरस्यवधतुल्यपादभवेहि चापं॥ आद्याधिकेन्येप्रथमांत्यपादौ ऊनंतथाद्वित्रिपदोक्रमाद्वि॥ परस्परंव्यत्ययतःप
दस्थंज्ञेयंतदन्यापमयोर्द्विकेच॥ यथागतं चाद्यपदोक्तवत्द्वितीयकेभार्धदलच्युतंतत्॥ तृतीयकेभार्धदलेनयुतं
स्याद्व्येत्वकांशविहीनितंस्यात्॥ लवादिकंयन्नहपूर्वकंतत्कलावतथ्यस्त ... चलांशकैश्च॥ संस्कृत्यसैत्राभूत
दृग्ग्रहःस्यान्मेषादितस्तद्ग्रहयोश्चमध्ये॥ अल्पान्तरंचाप्युपयोगिकंतत्तुतुप्रकल्प्यनोतानयनेनकार्यः॥ दृक्कर्मकालःख
चरोदयेस्तान्निरक्षजस्तेऽत्रदये ग्रहाः॥ निरक्षजात्स्थितखेटभोगादग्रग्रहस्याद्गमनतकेन॥ याम्येचरेसोम्यरा

न.वि. रेतत्पूर्वकालेन वास्तेपि तद्भुक्तारीत्या॥ खेटायने प्रोक्तमिदं हि सौम्ये याम्ये विलोमात्सुधिया प्रकल्प्यं॥ अथोदयास्तायनाक्ष
१०८ दृग्ग्रहो भवेत् सद्भुयात्स एव॥ असौ बलं तु भवति ग्रहस्य बिंबो निरक्षाक्षितिजास्थितेहि॥ ॥ यच्छेरो मणिकृता निजबुध्या
दृष्टिकर्मकालिकामयमुक्तं॥ तत्सदृशमिवस्य यतो दृश्यत स्ततुदितं हि यतोत्र॥ अथवा बलखेटस्य स्फुटरजा हि पु
वां राकाः॥ स्वपादियन दृक्कर्मकालांशोस्ते युतोनिताः॥ खगायनेषु मित्रैक दिग्त्वे च कृतो धिकाः॥ तद्भुना स्तेथ चेत्तौ
ध्वंनश्चध्ये चक्र संयुताः॥ स्वीयायनाख्य दृक्खेटोद्भवाजे विषुवां राकाः॥ तज्ज्ञानात्‍ ७७४ श्वासान्तेनं व्यस्तयाद्ग
द्वतो स्फुटं॥ अथ बिंबग्रहाद्वायन दृग्ग्रहस्साधनं॥ सूक्ष्म दृक्कर्म कालं वा न्यथैव प्रवदाम्यहं॥ पेरखेटविंबोपरिगो
कदंबहृयधुवाख्या द्वितयी स्वृतं॥ भमंडले तेकिल यत्र लग्ने तत्र ग्रहस्सायन दृग्ग्रहो स्तः॥ तयोः सदैवायन दृष्टिकर्म
कलाभिदृत्तोविरंतयात्र॥ बिंबग्रहांतश्च शरः कदंबवृत्ते तथैवाथ भवेत्ध्रुवोत्थे॥ बिंबाचलाख्य ध्रुवस्त्रोश्च यदंतरं स्या
द्विषुवाख्यतो॥ ते गोलसंधे विषुवां राकाः स्युर्विबग्रहस्यायनदृग्ग्रहस्य॥ चलस्थितस्याथ भवेत् ८ तगस्य तुल्याः नाम
सदैव ध्रुवस्त्रयोगात्॥ तो दृक् चलाख्योरिवरो भवेत्तो विंबग्रहोसौ चलस्तगः स्यात्॥ परस्फुटक्रांति भवद्गुमौर्व्या १०८
निघ्नीस्फुटक्रांति दिनज्ययाप्ता॥ विंबग्रहज्यात्र फलस्य चापांशायेतयोस्ते विषुवांशकाख्याः॥ षट्षष्टिभागज्यकया
✓ स्फुटस्तुविंबायनदृग्ग्रहांतः शरोथ नाप्याह्यविंबमध्ये॥ स्फुटापमोथायनदृग्ग्रहस्य क्रांतिर्भवेत्त द्विषुवांतराले ✓

विनिघ्नी स्वद्युज्यया यापनदृग्ग्रहज्या॥ तच्चापतुल्या विषुवांशकावा बिंबग्रहस्यायनदृग्ग्रहस्य॥ पलकोटिजा द्युगुणेन भक्ता
तज्ज्यात्रिमौर्व्या गुणिता तच्चापं॥ भुजो भवेदायनदृग्ग्रहस्य चलग्रहस्यैव पदस्थितः स्यात्॥ परस्फुटक्रांतिलवाः खनंदाप
कालदाद्यात्यपदोक्तबाहुः॥ स्याच्चपरस्तथाद्वित्रिपदोद्भवो योन्योन्य संव्यस्य यतः पदस्थः॥ इयोषु धेतद्वसतः पुरावत्
सूक्ष्मो भवेदायनदृग्ग्रहस्सः॥ एवं हि खेटायनदृग्ग्रहो यो यो विषुवांशो तत्तदंतरे च॥ परस्फुटक्रांतिभवांशकानां न्यूना
धिकत्वे सति खाकतो यत्॥ खेटो धृतेर्दृष्टिजकर्मकालो भवेच्च सूक्ष्मो घटिकादिकोत्र॥ याश्चांशाः खचराक्षिभद्युगोद्ग
ज्येकाजिनलवज्यकयाप्ती॥ परस्फुटापमदिनज्यकयाप्ताः बिंबजायनभवा चलनज्या॥ गांतरेत्र खगभोगजमेवं बिं
गंकिलकदंबकवृत्तं॥ बिंबात्ध्रुवस्फुटस्त्र विसदृशत्वी कृतावुधवरेरियमत्र॥ आयनाद्धि चलनं खगजं यत्तज्ज्यका च गुण
नाशरभौर्व्या॥ परस्फुटापमादिनज्यकाप्तं यो नरस्तु चलवषडंशाभितं तत्॥ दृष्टिकर्मघटिकादिसुसूक्ष्मं स्याच्छिरोमणि
कृतादपि दृग्जात्॥ परस्फुटेद्युभवकोटिजमौर्व्यास्सगुणा त्रिभगुणेन विभक्ता॥ अस्फुटद्युभवकोटिजमौर्व्या लब्धचा
पभवकोटिजलिप्ताः॥ दृष्टिकर्मभवतो यदि वास्मात् विंबजायनभवाचलनज्या॥ परस्फुटद्युगुणसंगुणिता सा क्रिय
याप्तधनुरायनकर्म॥ स्यात्तदेव खलुनद्धशतो त्र परस्फुटेषु रपि चोक्त क्रमरीत्या॥ यत्क्रांत्रैबिंबापमजद्युजीवा छतः

न॰ वि॰ खगद्युज्यकयैवमुक्तेः॥ दृक्कर्मकालः खचियन्नुपाताक्षेत्राक्षितिं चापमजामुबुध्वा॥ इत्यायनं दृक्छिन्नकर्म चोक्तमार्क्षे
दृक्कर्म यदाप्यथार्के॥ नत्वायनः सायनदृग्ग्रहोत्थः स्फुटापमो बिंबभवः खवेटात्॥ ताभ्यां यथोक्तो चरखंडकेयेनयास्तु
१०९ तुल्यान्यदिशो क्रमेण॥ विशेषं योगाद्भवतीह चाक्षदृक्कर्म चेत्थं हि सतां प्रसिद्धं॥ अथाक्षेनाप्यनदृग्ग्रहाय यत्तु संधन
र्यमसौम्यबाणे॥ तच्चोदयास्ते च तथाक्षसंज्ञमुक्तं हि लोमेन ततः स्वबुद्ध्या॥ एवमेवनतकालजदोर्ज्याक्षिज्ययाच्चगु
णिताविहृता च॥ स्वोपवृत्तदलकीर्तितिमित्यालभ्यमाक्षवलनोऽक्षजीवा॥ बिंबजद्युगुणमानविभक्ता॥ त्रिज्यया वगुणि
ताक्षलवज्या॥ उन्नमात्तसमयेनियमात्सा चापमाक्षवलनं क्रमतः स्यात्॥ सौम्ययाम्यमथनाक्षजनतद्वालना शाकस्तु
संस्कृतितोऽर्थं ला॥ स्पष्टसंज्ञवलनं द्विविधं तत्त्वाक्रमात्तत्त्वरातोऽस्य च यज्ज्या॥ सेषुकोटिगुणसंगुणिता सा त्रिज्यया चफ
लं चापलवाप्य॥ ताद्विहीनरवनवज्यकयाप्ता त्रिज्ययाच्चगुणिताच्छरहीज्या॥ तद्धनुस्फुटशरः समभत्त्वे चाक्षदृग्ग्रह
भुजेन सदास्य॥ संस्कृतौ भवति बिंबमुतोऽत्र स्पष्ट एवाहहतापमवत्सः॥ आक्षदृग्भवविग्रहस्फुटसंज्ञवालनांशकवि राम
युक्तवत्तिज्या॥ पात्यया न विहृता त्रिगुणघ्नी ज्यका स्फुटतरा शरदिग्वा॥ बिंबजस्फुटतरावलनज्या सा स्फुटेषुगुण १०९
संगुणिताप्ता॥ त्रिज्यया धनुरिहस्फुटसंज्ञं दृष्टिजं भवति कर्मसु यत्ने॥ प्रश्नोत्तराधिकारस्थसंधिरवेटमकारतेः॥ स्फु

ग्रु २

ट्यावलनं कृत्वा दृक्कर्म स्फुटमानयेत्॥ दक्षिणोत्तरशरक्रमतः स्वं बुधसंक्षं विद् दृग्वलने स्यात्॥ याम्यगे तु वलने विपरी
तं तत्क्रमेहे क्रमसद्ग्रहणाक्षः॥ साद्धिपोदयभवास्त्विह काले बिंबस्योदयभवातिलग्नेमिहास्ते॥ पक्षसप्तद्वइह सौक्षविलंबसौ
यभिजवशात्तस्तिहमुक्ते॥ भानाग्रहाणामुदयास्त्यलग्नसमुक्रमेस्या हृदयस्त्वथास्त॥ अक्षास्त्यलग्नोऽक्रमेनेच्चहं
स्यात्स्वसुभक्रमेण प्रयत्ना निलस्य॥ निक्षिप्तलग्नादुदयास्तलग्नेन्यूनाधिके यस्य खगः सदृश्यः॥ सपक्षस्तमोदधिको
क्रतोल्पारत्यस्तकाले निजदृग्ग्रहस्त्वेत॥ बिंबग्रहो निश्युदयं प्रयाति तदन्यथा भास्तमनं तथास्त॥ यात्विष्टलग्नादुदया
स्तकन्नाधिकेल्पके स्तोदयएष्ययातः॥ तदन्तराद्याघटिका गतेष्या स्वचालितः स्यात्सानजोदयस्ते॥ तद्धग्रयोरंतर
तोऽस्तकथाः कालात्मिका स्ताघटिकास्युराद्यैः॥ अभीष्टकालद्युचरोदयांतर्यदिष्टकालस्तु चराक्रमध्ये॥ प्रायास्त्विद
सान्निकटस्थितत्वात्स्वदृग्ग्रहे॥ नियमोऽन्यथास्ते॥ यत्र यत्र काले ह्यदयोऽस्य पातयन्नूनमस्या॥ नूनं नतस्वात्मकात्तस्मात् द्वा
ध्यमन्यनवधीमता॥ अथान्यथैवेंदुमुखग्रहाणां मानानि बिंबाङ्गमनान्यकाले॥ विनैव दृक्कर्म विलग्नासिद्धि स्वाक्षेन
क्षणतं प्रवक्ष्ये॥ रव्यस्तकाले प्रथमं स्वगस्य बिंबोन्नतज्याक्रियदत्रकार्या॥ दृग्वृत्तगोलस्फुटसंज्ञकाच क्रांतिश्चरोत्या
हिनतः स्वदेशात्॥ कृत्वा ग्रहस्योन्नतनाडिकाः स्वद्युरात्रियातेष्यभवाः प्रसाध्याः॥ केंद्रं त्रिभाल्पे द्युगलखगस्यपञ्च॥

नश्वि.
११०

ल्पके खेचरराशिशेषं ॥ षड्भाल्पेऽधिके रात्रिगतं तथेष्टं दिनस्य चांकाभ्यधिके तु नूनं ॥ तथैव साध्ये दिनरात्रिमाने खेटर्क्षयो
लग्नगणितप्रसिध्यै ॥ सिद्धं गतैष्याभिमितैर्विशुद्धं तद्गम्यमग्र्यं च कलं तदस्या सत्स्यो ॥ तत्स्वोन्मितैः शोध्यमिदं तु यातामित्थं द्यु
रात्रिप्रभवं गतैष्यं ॥ स्वार्कास्तकालो द्युषड्भयुक्तादर्कोच्चरात्रिद्युजशेषयाते ॥ लग्नं धनर्णं गदितक्रमाद्वा होदयेऽस्याद्युदि
यारव्यलग्नं ॥ एवं द्युशेषे रजनीतकाले गार्कक्रमेणोच्चखगास्तलग्नं ॥ अर्कोदयादेष्यमिनोदयांकौ ॥ कच्छुमामितेष्यैका
लः ॥ स्वरात्रिकालोदपि बोध्यमित्थं ततो गतैष्यैतक्रमतः स्वबुध्या ॥ निशोदयास्ताद्युदितौ किलैवं तावर्कसान्निध्यवशान्न
दृश्यौ ॥ अर्कोद्भवानामिह यस्य पूर्वं निरंतरं दर्शनमस्ति तस्य ॥ चंडांशुसान्निध्यवशादकस्माददर्शने चास्तमनं वदंति ॥ त
तः कियत्कालमदर्शने पि तद्दर्शने चोद्गमनं मुनीशाः ॥ प्रायोस्त्यपश्यत्वमिदं नराणां चंडांशुजालोकमवाक्षिघातात् ॥ प
दासन्नभावेन भस्योचितं हि निरक्तवृत्तेस्तादृशास्तस्य भागाः ॥ सदास्तोदययोस्तु कालो द्रष्टाः स्वकुजोर्ध्वसंगुरुकोऽपि नि
बध्यपार्के ॥ अर्कोदयादस्तमयात्तु ये ये स्वकालांशकनिर्विशेषाद्विंबसंदर्शनमस्ति तत्र स्वल्पे तदल्पेत्वधिके थ सूक्ष्मं ॥
दृश्याहि जीर्णाः कथयंति चेदं न केवलं कारणमाकरार्याः ॥ स्थूलं यतो स्त्यल्पकतेजसं यस्सूक्ष्मं तु तत्राधिकतेजसं स्यात्
जात्यापि नान्यानि भिन्नानि बिंबानि भयान्यापि ॥ तथोर्ध्वधिरसंस्थानि दूरासन्नानि चाकृतेः ॥ स्थूलसूक्ष्माण्यपीत्या

चया ७ कतेपि चोर्ध्वे ७ शे ७

राम
११०

निभेदं दृश्योऽयमस्ति यत् ॥ निशास्तसमयास्तेषां ज्ञानं नास्माद्दशामिह ॥ अतो द्युपर्थैः किल कालभागास्तेलक्षितायोगवशा
द्विभिन्नाः ॥ तत्कल्पनस्यक्ति मिह स्वतेन नास्त एवं जानं निनो तदस्ये ॥ द्विसमवेदेकुरवर्पनभागाद्विकसंयुताः कालजवानिशकाः ॥
चंद्रादिकानां गुरुसौम्यभास्ते द्विहीनिता कगयो स्वतंत्रैः ॥ ऊनाधिकाः कमनादप्रकेशुक्रोदयेष्यमगस्त्योदनस्य ॥ स्या
देनकालेन च तस्य तस्पुः कालांशकायावदिनं द्युगेहे ॥ यदाप्रोक्ताधिकैः कालभागैरर्कोदसदंग्रहः ॥ तदेवंतं दृश्यस्या
दल्पेसौ न कथंचन ॥ स्वोदयकालांशतुल्यं हि समये का स्तत: परं ॥ उदयान्याद्रव्यसुन्यकृतदर्शनाविबकं ॥ प्रोक्तं तेना त्र नि
र्णीतिः ग्रहार्कांतरकैर्ल ॥ प्रोक्तकालांशकाभागेस्तुल्यं भवादिनि ॥ कालांशकात्र दक्षत्रांशा अर्कग्रहयोर्यदा ॥ अंतरं
स्यात्तदा दृश्यं तद्विंबसुतरां ततः ॥ अधिके ंतरं चाल्पे दृश्यं नैव कथंचन ॥ परमत्र दृक्काले थ दृग्ग्रहार्कानुपाततः ॥ दारस
बंधतः सिद्धं प्रतिसुगं विलक्षणं ॥ दृग्ग्रहार्कांतरं तत्र ज्ञातुं दुर्बोधमस्त्यतः ॥ लपाल्गनांत्रीशमेणाल्वन्येप्रोक्तं चनयथा ॥
केवलस्फुटखेटार्कविवरो ह्यदासवेत् ॥ प्रोक्तकालांशजद्वेत्रभागैस्तुल्यं तदा ततः ॥ आसन्नमिवतानि केंद्रकरवेटार्कांतरं
भवेत् ॥ तादृशः प्रतिपन्नांतं प्रायः स्तर्यांतरं ततः ॥ आसन्नमिव चालदूरं स्पर्शयोर्क्रमंतरं ॥ नक्षत्राणां च कालांशो तिति ॥
विंबस्य साधनं ॥ सार्वभौमेकृतं यत्र प्रसंगात्तद्विहोच्यते ॥ ज्ञानियोऽनेकधर्मसं विनिघ्नंशानिविंबकालिका भयस्फुटं यत्

कं ३

त॰ वि॰ भजयोजनकर्णसंविभक्तं तिथिकालांशभवं वलितिकालस्युः ॥ एताः कलाः पंचदशाहताः स्वकालांशाप्तकानि निजबिंबमित्यो ।
यैर्भास्करो कर्क्जनतां तनुबलाद्वलीमान् दितं न सजर ॥ यानी निरूक्तश्रुतिबिंबकाणा निथ्यंरकालांशकभस्य बिंब
१११ ॥ यथाकल्पितं तद्दिहग्रहाणां बिंबप्रसिद्धिर्नकथंयतो त्र ॥ अत्रान्यखेटश्रुतिबिंबकार्यो तत्तुल्यकालांशभस्य बिंबं ॥ कल्पेव
तद्वारकृतंयदस्ति तिथ्यंशकालांशकभस्य बिंब ॥ यान्युद्भवेनैव न तत्समानं भवेदतस्ताद्दृमतेन रम्यं ॥ किंचाग्निचंद्रे निम
कालमा गागस्त्यादिसु स्थूलसुदृश्यमानि ॥ यान्युडुबालकपिलप्रकारा कल्पितबिंबादपि नाल्पकानि ॥ नैवाधिका
नीति सुदृष्टिमार्जानता न्यूकानिचदाविरोधात् ॥ स्वयंमस्तकालिको पश्चात्प्राच्यामुदयकालिको ॥ स्फुटावर्कग्रहो कार्यो
दृग्ग्रहाप्यथपूर्ववत् ॥ रविगोयाधिकभुक्तिर्यस्पर्शी प्राभिधानसः ॥ स्वयंस्याल्पिका भुक्तिः सज्ञेयामंदसंज्ञकः ॥ मंदा
अर्काधिकाः पश्चादस्तंजीवकुजार्कजाः ॥ पुनः प्रागुदयं यांति शुक्रज्ञौ वक्रिणौ तथा ॥ पुनर्विवस्वतः प्राच्यामस्तं चंद्रज्ञाभा राम
गेवाः ॥ अर्काज्ञान्याधिका पश्चादुदयं यांति यावता ॥ इत्थं खशास्त्रे रविणाप्रकाशादस्तोदयौ क्रमात् ॥ अथ तत्कालगम्याद्दि १११
कालज्ञानमिहोच्यते ॥ स्फुटार्कखेटांतरजातनाडीरसाहताः कालवाः स्युरिष्टाः ॥ उक्ते प्युनाडयाधिकाय दीष्टानखे
टोदयो गम्यगतोऽन्यथास्तः ॥ प्रोक्तेष्टकालांशविधियोगलिप्ता खेटस्थितांशोदयभागभक्ताः ॥ ग्रहार्कलिप्तिकाताकेज
गम्यंतर

वैकेन हताः फलं ते ॥ लब्धोदिनाद्यो गतगम्यकालः स्तात्कालैः खेटार्कवशान्मुकुः सः ॥ स्थिरो भवेत्संव्यवहारयोग्यः स्पष्टः
रकास्यो क्रमेनातपो हि ॥ अर्कालपकलेमंदु खेचरस्यमस्तोदयः पश्चात्समयं प्रतीच्यां ॥ अर्काधिकलेत्वथ शीघ्रगस्य सूर्या
ल्पकले समयोऽस्ति वैद्यां ॥ अर्काधिकलेऽभ्युदयं प्रतीच्यामस्तं तदेकावगमः स्वकालात् ॥ शीघ्रेल्पकवान्मदुगोधिकेऽर्क
स्यात्यस्तसमुद्गुंयसमुद्गमं य ॥ ज्ञातुं मतौ स्तितदर्थमनाविरामभाया स्तिमतप्रवाभि ॥ प्रोक्तेष्टकांशराभूतः कलाभिः
साध्यास्तदानी दिवसा एतेष्वा ॥ अंग्रेजतेः खेटसमुद्गमः स्यात्सदाथचैवं मदुगोल्पकेकौत ॥ शीघ्राधिकेनाक्वदेव
पूर्वप्रोक्तेष्टमुकस्थदिनैः सदास्तः ॥ शीघ्रग्रहेवक्रिणिमंदवत्स्यादस्तोदयात्तदिवसा अपि श्रां ॥ द्विभेलतुः कालल्पवे
स्तादित्थं नोक्तं हि दैवैः प्रकृतं विहाय ॥ खेटार्कजवेत्थमिहानुपातात्स्थूलं हि लत्तं निहितं तु मत्स्यात् ॥ दूरेनतश्चात्रवि
णात्एवनोक्तं विशेषानयनं मयार्थ ॥ ग्राशुक्रात्सुजस्य गुरुमर्यवक्रां गतिप्राप्यतत्रैव पातः प्रतिष्ठां ॥ ततः प्राक्समुद्ग
म्यवक्रात्तुल्यं समसाध्यते त्रैव वा स्तंक्रांतौ ॥ ॥ अत्रोपपत्तिः ॥ ॥ उदयीकश्चिन्यूनस्य पूर्व मधिकस्यानंतरमिति तत्ता
वत्सुप्रसिद्धं क्षितिजोर्ध्वगोरात्रौ चेद्दृश्यो ऽन्यथात्वदृश्यः ॥ अर्कादल्पे मंदतस्योदयानंतरमर्कोदय इति रात्रौ पूर्वोद
युदयस्तदंतरोपचयात् ॥ अधिके तु गतरात्रावेवं पश्चिमास्तस्तदंतरोपचयात् एवं शीघ्रस्य व्यत्ययेन सुगमं ॥ अर्का

त·वि· धिके मंदे स्याच्चीघ्रोगइतिपरमाल्पोग्रेस्यात्॥तत्कालाभुजरोत्तरं ग्रहार्कांतराप्चयःक्षयंमुपचयः॥तद्गतपोरंतरे स्वेष्टकालां
शाःउक्ताकार्यशाउदयास्तारंभजाः॥तत्रयदेष्टाउक्ताधिकास्तदातन्न्यूनज्ञानेच्छयाग्रेऽस्तः॥अल्पेत्वधिकांतरेच्छयाघ्रुवंम
११२ स्तः॥एवमर्कोल्पेमंदे उत्तरोत्तरमंतरोपचयोग्रे पूर्ववत्पचयः॥तत्रयदेष्टाधिका इष्टाकांदातन्न्यूनांतरेच्छयापूर्वमुद
योल्पेत्वधिकांतरेच्छयाग्रेतदुदयः॥एवंशीघ्रेकाधिकेपि तयोरुत्तरापचयोग्रे पूर्ववत्पचयस्तानाकाधिके स्वेष्टेतन्न्यूनां
तरापेक्षयापूर्वमुदयोल्पेत्वधिकांतरेच्छयाग्रेसमुदयश्च॥एवमर्कोल्पेशीघ्रेउत्तरोत्तरंतदंतराप्चयादस्तश्चाग्रेत
त्रेदिष्टस्याल्पत्वेधिकांतरज्ञानेच्छयापूर्वमस्ताधिकत्वेतन्न्यूनज्ञानेच्छयाग्रेस्तश्चेत्युपपन्नंयथोक्तं॥ ॥एवंमंदेधिकेशी
घ्रेल्पेवार्कात्तदातयोर्योगःपरमास्तसंज्ञोग्रेस्यात्॥तत्रर विमंदेनसहसंयुज्य ततोमहादग्रेपिकालांशाजक्षेत्रांशांत
रितमुदयार्थं॥परमास्तंयावत्तयोःप्रथमांतरे स्वेष्टकालांशास्तत उक्ताइति॥तद्युत्युत्थादिनेदयःस्वकालात्परमा
मुर्लुप्येतिचस्पष्टं॥एवमत्रस्वकालादस्तज्ञानंयुक्त्युत्थादिनैरर्थज्ञतमहस्यादित्युपपन्नंसर्वं॥ ॥इत्थंकालांशानुल्या॥ राम
चग्रहार्कांतरतःस्तं॥साधनस्थूलकालस्यतेनार्काद्ग्रहवाघि॥यद्यंतरंकालभागाधिकंस्यालहितदिने॥रात्रिम ११२
नयग्रहदृश्यःस्वदृश्यसमये किलो॥तदन्यथास्तरात्रौकालांशाभ्यधिकांतरात्॥दृश्यस्वेटोथवास्तःस्यात्तदल्पा

तरत्स्तथा॥अगस्त्यलुब्धकग्लहृदयाभिजिदिंद्रभे॥चित्रादित्यानिलर्क्षेचकालांशाविंश्वसंमिताः॥भगार्यमाश्वि
नीद्वीशमघाचात्सभवासवे॥हस्तश्रवणयोर्भागाःशक्राःस्युस्त्र्यर्क्षसमाः॥अग्निरुद्राहिमित्रांबुयेष्वदेवतमूलभे॥ति
ष्यंराःस्युःपुष्यमृगयमभानांतुमूर्छनाः॥शेषभानांघनाःकालभागास्तेःस्वोदयंगतः॥तमसोदयभानुःस्यात्स
तलग्राहिणाविधं॥लग्नेरवेर्भागैःस्याइत्तभानुश्चपङ्क्युक्॥स्वेष्टस्वर्यंतरलिप्ताविभुतयुगुताःफलं॥दिना
यंगतगम्यंस्यादिष्टस्वर्येधिकानके॥स्वस्वार्कोदयतोभस्योदयास्तावुदितोयतः॥यत्राधिकोस्तभानुस्तुयस्यस्वो
दयभानुतः॥सौम्ययोरतिदेर्घ्यात्स्यादिनास्तमवशान्नहि॥कथंचिन्नतुलस्यास्तःकिंतुभत्तजवशाद्भवेत्॥अभिजि
द्ब्रह्महृदयंस्वातीवैष्णववासवाः॥अहिर्बुध्न्यमुदक्स्थत्वान्नलुप्यंतेकरश्मिभिः॥धृवक्षेत्रांतरेतुकालांशाधिकां
तरशरांतरे॥उक्तास्तेपर्यंतोविंबद्रेजस्तनलुप्यते॥भानामनोदयःप्राप्यापातीच्यामस्तइरितः॥सौम्यस्पष्टाप
मोलेवाधिकराद्भसदोर्ध्वगं॥गर्भहृजातथाधस्तयाम्यस्पष्टापमोक्तितः॥अथास्तुहलप्रातिपदिनेसंगतेर
वौतौशाशितिग्मरश्मी॥साध्यौस्तुर्चेदस्मसश्चपातस्ततःपरस्या॥त्स्वलुसौम्ययाम्यः॥स्पष्टापमश्चाथविल
ग्नकंतकेंद्रंचदृक्क्षेपउदग्य[illegible]नाशः॥नभोमरीत्याग्नणकेनका यास्तन्नेउविंबीयनतानतोशाः॥त्रिभुज्या

त॰वि॰ ११३ रीत्याथतलः प्रसाध्यस्तु नास्तमत्रं द्युमसो नतकालः॥ घघ्नादिकः षड्गुणितः स चेत्स्यात्कालांशकेभ्योऽप्यधिकस्तदानीं॥
सुस्पष्टमष्टांगोक्तरिह्विरेषु इन्दुः शुक्लो॥ रविक्षान्त्यदकरोऽभ्युदयः॥ नैवान्यथा॥ किंतु तदग्रिमे स्याद्दर्शे सरायवो व्यमिनास्तकाल
॥ यद्युक्तकालेशकतोऽल्पकेऽपि विदृल्यरवर्धरवकुग्रविधृक्॥ अऊजडांशो रविलोकनं यः कैस्यापहासोऽन नरस्य तस्यात्
॥ उत्रावतत्प्रतिपद्यातद्धा तदर्शनानिर्णयात्॥ निर्णीयते येन दृश्य स्तदर्थं स्पष्टिन स्यात्॥ यदस्तकालात्परतोऽथ पूर्वमासन्नका
लेप्रातिपाह्विरामः॥ इन्दोस्तदृले च यथोक्तवत्स्यात्सदर्शनादर्शनकं तु मुख्य॥ अर्कोदयात्प्राक्परतः स चेत्स्यादासन्नकाले
नियतं तु तत्र॥ अस्तेऽग्रिमे दर्शनकं तथा स्यादर्शनं सर्वभवेस्तकाले॥ उदयासन्नकालस्तो यघ्नेत प्रतिपत्तिथेः॥ तत्र
स्यादर्शनादेवाग्रिमास्त निर्णयो नहि॥ तत्रस्थदर्शनादेवप्राग्भवेस्तेन निर्णयः॥ किंतु तथ्यस्य याद्यान्यो दर्शनादर्शनक्र राम
मात्॥ सारण्या मंक्षणतिर्यग्विस्पष्टयुक्तितः॥ उपहासोऽथवा चन्द्रादेवी रवेर्निमीलनेन रः॥ ॥ इति श्रीकमलाकरविरचिते
सिद्धान्ततत्त्वविवेके उदयास्ताधिकारः॥ ॥ ॥ अथ सूर्यचन्द्रग्रहणसंभवं प्राक्प्रवदामि सम्यक्॥ यज्ज्ञानतस्तु ११३
ऽगणितप्रयासः कृतो वृथा नैव भवेद्ग्रहेषु॥ सपातचन्द्रस्य भुजांशकाः श्चेदि द्वाल्पका स्युर्ग्रहसंभवः स्यात्॥ दर्शान्तकाल
स्तु तदा हिमांशोरेवं रवेर्दर्शविरामकाले॥ तत्कालजानां नतनाडिकानां ग्रहादिकोऽयः किल वेदभागः॥ तद्भूनयुक्तपात्

प

पर्गेन ते वेदसदुष्णधामध्यनतांशकाये॥ तेषां रसांशेन सुसंस्कृताः स्युः स्फुटा सपातेन्दुभुजांशकास्ते॥ नगाल्पकाश्चेद्ग्र
हसंभवः स्याद्रवीरिदं सद्धृधीतिबोध्यं॥ मासे स्वपोमादिकपातयुक्तो चन्द्रोऽत्र २ भं ० रा ध्रुवः ८० पं च व २ द्वा १५॥ मासैः
षड्भिः पक्षयुक्तो न नैर्वापुरेवात संभवः सविलोक्यः॥ इक्कस्तत्र संस्थोऽभवतः कुमध्ये दृग्गुप्तदेशेऽपि पतः सदातः॥ स्यात्र
र्णिमांते ग्रहणं सुधांशोर्नैव रवेर्दर्शविरामकाले॥ रवेश्च तस्यात्स्फुटदर्शकाले सोत्र स्फुटो लंबनसंस्कृतोऽयः॥ इक्कस्तत्र सं
स्थो रविशीतरश्मी यतः स्फुटदर्शविरामकाले॥ विधोऽपर्वान्तकालश्चेदात्रौ त्वर्पस्य चापितं॥ विलोक्यं ग्रहणं तत्राऽन्य
थाप्यत्र क्षितेर्वशात्॥ उदीरितं पश्चग्रहणे रवीन्द्वोः स्थितो पुनर्लंबनवत्स्फुटत्वे॥ श्रीतिग्भुजाये निजतिकर्मतत्रयुक्तिनपश्य
मि परां खगोले॥ ॥ इति श्रीकमलाकरविरचिते सिद्धान्ततत्त्वविवेके ग्रहणसंभवाधिकारः॥ ॥ अथ त्विषड्गुनास्तितो
लवाय स्तुल्यो स्फुटोऽस्यैव विधुश्च महास्तः॥ सम्पूर्णिमान्ते त्वयसत्कालत्स एव चन्द्रग्रहार्थं प्रथमं प्रसाध्यः॥ तत्कालजाता
विचन्द्रपाताद्यैः परवीन्द्वोः श्रवणौ स्फुटौ च॥ तथैव दृक्कर्मसमानमिति सत्कुर्वरकुरपष्टबिंबाहिकबाह्यमिंदोः॥ विधोः कला
याविशिरवः पुराणपैवोलभा नष्माहिसहूम॥ तुरथावेदिता प्रथमं प्रहदैः कार्या हि चन्द्रग्रहणं निशायां॥ तत्राविकि
रणसंगादेषपानीयपिंडो दिनकरादिशि नैव चान्द्रिकामिश्रकान्ति॥ तद्दिलरादिशिनैवं सर्वदा शीतभानुर्घटेश्वनि

जमूर्तिच्छाययैवातपस्तु ॥ यत्रेंदुदर्विवीयस्तु गोलखंडं भूसंमिबिंबं भूस्थितदृष्टियोग्यं ॥ नान्यत्तद्दर्शनयोग्यबिंबं स्यात्पूर्णि
त.वि. मांते सकलहिमांशोः ॥ चेदर्कषड्भांतरभूमिमायाबहिर्गतं ताहिमांशुबिंबमस्ति ॥ यदा तु भांतर्गतमिंदुबिंबं तदा भवेत्तद्ग्रहणे त
११५ शुक्लं ॥ यद्दर्शनानर्हमिहाखिलं तु विचारणानर्हमपीति वेद्यं ॥ स्यात्खोदयास्ताक्षितिजाच्च दैर्घ्यं शशांकबिंबं किल स
र्णिमांते ॥ अर्कस्ततः षड्भमितांतरे च यदा भवेत्क्षितिजादधस्तात् ॥ तदा कुभाछन्नमिवेंदुबिंबं भूसंस्थितः पश्यति पू
र्वदृष्टं ॥ नन्वत्र शीतांशुकरप्रकाशात्कुभाविनाशो न कथं भवेत्तत् ॥ शृणु त्वमिंदोर्निसितत्वतस्त्वयतो भवेदर्ककरप्रसं
गात् ॥ कुगोल [illegible] लोककरान चंद्रे पतंति तस्मादसितः सुधांशुः ॥ कुभागतं तं कथयंति लब्ध्वा परस्परं तो [illegible] भेदू ॥
॥ अर्कस्य बिंबगोलोत्र महानल्पस्ततः सदा ॥ भूमिगोलोथ तेनाखिलस्त्वच्चयाभिमिमानि [illegible] ॥ अयंती चंद्रस्पर्शौ च दू
रस्था हि बहिर्गता ॥ [illegible] गणितरीत्या तत्प्रसिद्धं गोलविलक्षणा ॥ [illegible] यातगती नांवरात्रिः स्याद्दृव्यदर्शनात् [illegible]
रूपा च सा तौ विकथयंति तमोभिधां ॥ अतस्तद्ग्रहणे चंद्रं पिधत्ते तद्भमो न ये ॥ चंद्रपातो गृहीतात्र तन्मतेनैव मन्मते ॥ अ राम
र्कग्रहे पि चंद्रस्य छायासंस्थो न पश्यति ॥ पिधत्ते सूर्यबिंबं च स्वछायांतर्गतिंदुना ॥ स एव छादको युक्तो [illegible] दृष्टव ११५
रोधकृत् ॥ नेंदुपातस्तथा किंतु तत्सान्निध्याग्रहस्तु सः ॥ सुनिर्मले रूपविहीन इंदुगोले रवेर्नैव करावरोधः ॥ दृष्टो
ते

स्तितक्रोलजवृत्त्योगः आयामविस्तारविवर्जितोतः ॥ करावरोधेन विना कुरूपः कथं पिधत्तेव सहस्ररश्मिं ॥ विरूपगोलाव
यवा कुरूपाः पातस्यरूपं तु कथं न दृश्यं ॥ ग्रहणादन्यकालेपि कथं न ग्रसती हसः ॥ पातस्थानास्थितेर्याचेतद्वशान्न ग्रह
त्यतः ॥ तेन सपातराहुस्तु ग्राहकं तत्तु मान्नयव ॥ [illegible] यमाणाद्व्यक्तत्वेवं श्रुतिस्मृत्यविरोधतः ॥ विरोधेपि समाधानं कुर्वं
ति तद्व्सत्प्रुवं ॥ यतो ग्राहकभिंबाच्च बाहुः पातेपि संग्रहः ॥ स्वभांतर्गत एवेंदुः पिधत्तेर्कं हि तेन वा ॥ अर्थे [illegible] तद्ग्राया छा
दकत्वं रविग्रहे ॥ इदो स्तदपि [illegible] स्थमार्येः पुरातनैः ॥ ग्रहद्वयेपि निर्णीतं तिमिरावरणं यतः ॥ अतस्तत्तमस्वा
वराकुरावरणं किल ॥ नेंदोर्कग्रहणे यस्य श्रुतिस्मृत्यादिदृष्टितः ॥ गछन्स प्राक्सुखो यस्मात्सर्वदा कुरुतेराशी ॥
कुभांतः पूर्णिमांते च स्पर्शः प्राक्तेन जायते ॥ मोक्षः पश्चाच्छशांकस्य ग्रहणेथ रविग्रहे ॥ स्पर्शः प्रत्यक्च विमुक्तिः ॥
प्राक् जायते तरणेः सदा ॥ रवेरधःस्थितश्चंद्रो यतः प्राक्भ्रमतः सदा ॥ सत्यं प्राप्नोति संछादयन्वक्रविमंडलं ॥ पारंप
र्यात् कुभाशानमसत्क्रिया न सत्क्रान् ॥ अतो युक्तियुतं [illegible] गोले ज्ञात्वा वदाम्यहं ॥ इनावनीव्यासवियोगखंडं भुजार्कं
कर्णः श्रवणश्च कोटिः ॥ तद्वर्गयोरंतरमूलमेवं जात्या हि मानयन प्रासिध्यै ॥ कुखंडनिघ्नः श्रवणो भुजाप्तः कु
गर्भतः स्यात्क्षितिमाग्रदैर्घ्यं ॥ कुखंडकोद्याप्तिहतो भुजोप्तः कुटकतः स्यात्क्षितिमायखं ॥ कुभाग्रदैर्घ्यात्क्षि

× सूक्ष्मरीत्या सूर्याच्चपङ्क्तान्तरितः स्यादेन। तच्छ्बके द्रन्तु नदर्प। चिन्हे यदर्कगत्या
ऋमात्। तीद्रकाष्टं। याभा दतोर्ध्वांधरमध्यसूत्री ×
वै ७

न॰वि॰ निरुर्वङ्कर्वगीत्तरात्पदं वाक्षितिभाग्रदृष्टं॥ कोघ्यादतंकर्णहृतं कुबकेंद्रलब्धांसविङ्कुसदृशप्रमाणं॥ कुखंडशीतद्युतिकर्ण
११५ वर्गविधोगमूलं तादृहायसंज्ञं॥ आद्यो निलतात्क्षितिभाग्रदृष्टमलंबनङ्कुसद्वोनिघ्नं॥ कुभायुदृष्टेनदलंफलज्या स्याद्ध
त्यसंज्ञंतुभुजेनिघ्नं॥ कर्णेनभक्ते हफलं यवत्स्याद्योजनैः सात्रिगुणेन निघ्नी॥ भकेंदुकर्णन [illegible] फलस्य चापं द्विभकु
भाव्यासईंदुगोले॥ कक्षास्थलिप्ताभयवापरूपः स्वयायलिप्तामयपलिप्तस्तः॥ सङ्गोलजद्वीत्रसूत्रास्तुतिर्यक्
रूजस्तवरूपा॥ स्वीदितास्तुभ्रमतरांकुभांतिरिंदुकर्णान्तरितांवदाम्॥ आद्योक्तस्थलभाकोट्याक्येकर्णस्वरूपिणी॥
अतः कर्णगुणाद्योक्तकुभाकोटिहृतास्फुटा॥ यद्द्कर्णघ्नखंडभुजभंद्रुश्रवोद्धृतं॥ कोद्यर्धद्व्स्फुटा त्रिज्याघ्नींदु
कर्णहृताचसा॥ नचापस्थलभातिद्कुभाचाद्यात्यारस्फुटे॥ भकेंन्द्रदतगोलस्य निर्यद्धिधः किरणसंगमात्॥ कुगर्भ
तोदूरतरः शशांकः समीपवर्ती चसहस्रभानुः॥ यथायथास्याद्धि हिवंद्रगोलेतथातथाल्पाक्षितिभासदैव॥ तद्रूप
रस्थित्वाधिकाद्भयश्चेदूराक्षितत्वेनिकटोक्तितो॥ स्यात्तारतम्याद्वर्जिभूमितूमध्याख्यकक्षोद्भवमितिमानतः॥ अयु राम
तो कुभामाघरीत्यासदृश्वा कुतारंगनायस्यपुत्रेणस्वक्ष्मा॥ निजसार्वभौमानुयायिनास्वबुध्याग्रगीम्यन्नतालन्मुरवो ११५
तैथसम्यक्॥ भव्यास्वगोरविविंबभक्तः फलोनयुगमन्निजाविलतीयं॥ तद्घातपादस्यपदायहीनस्तर्येदुकर्णोभि

यतस्तदातो॥ फलेनहीनं रविबिंबमिंदुकर्णाहृतंभास्करकर्णभक्तं॥ लब्धेनहीनं फलमत्रस्यात्मा भवेत्कुभाविस्तृतिरिंदु
मार्गे॥ इतितन्मतंसदृक्तियस्मात्क्षितिभातस्य मतंतुनेंदुमार्गे॥ तदुद्धरितरीतितः कुभांशभागादयएवसर्वदानः
॥ इहनावरणं कुभा विभोस्तद्ग्रहणं तज्जनितं कथं सवेद्य॥ अथमूकपरंपराप्रसिध्यानत्रिपतात्प्रथयेवतस्येनान्यः॥ प
तत्कालमानयनंविना व्युमखोद्ग्रहेरणायवैरस्तदृक्॥ सङ्कलक्षत्रोविवारदक्षैः कालक्षितोयेनममाक्लिष्य॥ इनेंदुबिंब
ग्रहणादिनेद्वः कर्णस्थलत्रोदितमायरीत्या॥ फलसंद्र्हरेणानयनं कुभायाः स्वल्पान्तरात् हितलोतिसम्यक्॥ यतःस्व
ल्पांतराकर्णाकिर्णायद्गुणिताभवेत्॥ तथातद्गुणितंविंबाद्विवचंद्रार्कयोः क्रमात्॥ ॥ अथोपपत्तिः॥ ॥ रविबिंबगो
लकेंद्राद्रविकर्णान्तरभगोलकेंद्र॥ तत्रयरविकिरणास्तस्यवरुद्धा भूम्यग्रेनगर्भवती तितदभावाद्दृग्विषयांधका
रएवनीलरूपवान् रथ्यदर्शनाद्। किंस्वक्रोयाशब्देनोच्यते। सावछायैव। रविबिंबगोलाद्भूगोलस्यात्यल्पपरि
माणत्वाद्विबिंगोलदृष्टादासमंता। किंस्तनां किरणानां भगोलदृष्टस्पर्शनागतानामग्रेतत्संबंधस्यादेवतत्रा
त्रभवछायाग्रचिन्हं स्यात्॥ रविकिरणैराछादितात्भगोलात्रीतितस्पृष्टकिरणैकस्त्चीरवात्स्वरूपांशछायाक्षेत्रति
ष्ठेतत्रासमंताद्येमार्गभृष्टस्पृष्टाः किरणास्तन्मार्गेणयद्भ्रमोवर्जंमुतस्त्वं तत्तत्रमुखं। तद्धनकेंद्राद्भूछायावधिकोवे

त॰वि॰ ११८ पश्च॥ किरणानामंतःकिरणसंबंधाभावाद्धतस्त्वग्राकारादीर्घच्छायैवास्ति॥ किरणाद्बहिस्तु सर्वत्र किरणसंबंधान्न
च्छाया॥ चंद्रकक्षागोले यच्छायाविस्तारः स एव चंद्रग्रहणार्थमुपयुक्तः तज्ज्ञानार्थं। रविबिंबगोलकेंद्राद्भूगोलकेंद्रस्पर्श
१ छायावधिकं दीर्घत्वं न संविधेयं तन्मध्यसूत्रं। तत्रार्कबिंबगोलभूगोलपृष्ठयोर्यत्र स्पृष्टं तत्र तयोः स्वस्वपृष्ठकेंद्रस्या
त्॥ तत्केंद्रात् स्वस्वगोलपृष्ठे तद्गोलपरिधिचतुर्थांशेन चापरूपेण यद्वृत्तं न तत्स्व स्वपृष्ठार्धवृत्तं स्यात्॥ अथ रविबिंब
गोलपृष्ठार्धवृत्तादूर्ध्वं यद्गोलखंडं तद्भूछायासिध्यर्थं बाधितमेव॥ तत्र किरणानां तत्संबंधाभावात्॥ अथ पृष्ठार्धवृत्ते
विचारः स यथा। रविबिंबगोलकेंद्रात् पृष्ठार्धवृत्तप्रदेशपर्यंतं रविबिंबगोलव्यासार्धमितं सत्रिभुजरूपं। ततः को
टिरूपं मध्यसूत्रं समानांतरालं यत्सूत्रं तत्तुल्यप्रदेश एव स्पृष्टं नान्यत्र। परंतदपि सम्यक् तेन कार्यक्षमं सर्वत्र समांतरि
तत्वेन तस्य मध्यसूत्रेण सह संबंधाभावात्। अथ यन्न कोटिरूपं तदपि यद्रविबिंबगोलपृष्ठार्धवृत्ताद्भूगोलपृष्ठार्धवृत्त
स्पर्शकं ऋजुसूत्रं मध्यसूत्रे स्पृशति तादृशं तु पृष्ठार्धवृत्ताधःप्रदेशेन चापरूपेण कथमपि स्यात् यद्वि तु प्रा रा॰ ११८
चीनैः किंवदंत्या द्वितीयते तदपि विना गोलपृष्ठभेदं नोपपन्नमिति न स्वकार्यक्षमं न द्वितीया किरणानामसंभवात्॥
